No. ६३५ - घ

Title सांख्यतत्त्वकौमुदी

Author वाचस्पति मिश्रः

Extent २६ Age

Subject सांख्यशास्त्रम् · सम्पूर्णम्

नं० ६३५-घ

सांख्यतत्वकौमुदी (सांख्यशास्त्रम्)

२६ पत्रे

६३५-घ

पत्राणि २६ (सम्पूर्णम्)

~~लिपि~~ कर्ता वाचस्पति मिश्र।
लिपिक। गुमानीराम।

सांख्यतत्वकौमुदी पर६

श्री आद्ये परे

सां० कौ० १ ॐ गणेशाय नमः अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां नमामः अजा ये तां जुषमाणां भज
न्ते जहत्येनां भुक्तभोगां नुमस्तान् १ कपिलाय महामुनये शिष्याय तस्य चासुरये मुनये पञ्चशिखाय तथे
श्वरकृष्णायैते नमस्यामः २ इह खलु प्रतिपित्सितमर्थं प्रतिपादयन्प्रतिपादयितावधेयवचनो भवति प्रेक्षा पर ३
वतां अप्रतिपित्सितं तु प्रतिपादयन्नायं लौकिको नापि परीक्षक इति प्रेक्षावद्भिरुन्मत्तवदुपेक्षणीयः स्या
त् स चैषां प्रतिपित्सितोर्थो यो ज्ञातः सन् परमपुरुषार्थाय कल्पत इति प्रारिप्सितशास्त्रविषयज्ञानस्य परम स्त्र ५
पुरुषार्थसाधनहेतुत्वात्तद्विषयजिज्ञासामवतारयति दुःखत्रयेति दुःखत्रयाभिघाताज्जिज्ञासा तदप
घातके हेतौ दृष्टे सापार्था चेन्नैकान्तात्यन्ततोभावात् १ एवं हि शास्त्रविषयो न जिज्ञास्येत यदि दुःखं ना
न४ म जगति न स्यात् सद्वा जिहासितं स्यात् जिहासितं वा शक्यसमुच्छेदं अशक्यसमुच्छेदता च द्वेधा दुः
खस्य नित्यत्वाद्वा तदुच्छेदोपायापरिज्ञानाद्वा शक्यसमुच्छेदत्वेपि च शास्त्रविषयस्यानुपायत्वाद्वा सु ज्ञान ३
करोपायान्तरस्य सद्भावाद्वा तत्र न तावद्दुःखं नास्ति नाप्यजिहासितमित्युक्तम् दुःखत्रयाभिघातादि
ति दुःखानां त्रयं दुःखत्रयं तत्खल्वाध्यात्मिकं चाधिभौतिकं चाधिदैविकं चेति तत्राध्यात्मिकं द्विविधं १

स्तदपघातकः उपसर्जनस्यापि बुद्ध्या संनिकृष्टस्य तदा परामर्शः अपघातक ७

शरीरं मानसं च शरीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम् मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषा
दर्शननिबंधनम् सर्वं चैतदांतरोपायसाध्यत्वादाध्यात्मिकं बाह्योपायसाध्यं च दुःखं द्वेधा आधिभौतिकं
आधिदैविकं च तत्राधिभौतिकं मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तं आधिदैविकं यक्षराक्षसविनाय
कग्रहाद्यावेशनिबंधनं तदेतत्प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यं प्रत्याख्यातुं तदनेन दुःखत्रये
णांतःकरणवर्तिना प्रतिकूलतया चेतनाशक्तेरभिसंबंधोभिघातः एतावता प्रतिकूलवेदनीयत्वं जिहासाहे
तुरुक्तः यद्यपि न स निरुध्यते दुःखं तथापि तदभिभवः शक्यः कर्तुमित्युपरिष्टादुपपादयिष्यते तथा चोक्तं
तदपघातके हेताविति तस्य दुःखत्रयस्यापघातकस्तथा हेतुः शास्त्रगम्यो नान्य इत्याशयः अत्र शंकते दृष्टे सापार्था
चेत् अयमर्थः अस्तु दुःखत्रयं जिहासितं च भवतु च [illegible] न सहते ता च शास्त्रगम्य उपायस्तु [illegible] तु तथाप्य
त्र प्रेक्षावतां जिज्ञासा न युक्ता दृष्टस्यैवोपायस्य तदुच्छेदकस्य सुकरस्य विद्यमानत्वात् तत्वज्ञानस्य नेकजन्म चाप
परंपराया ससाध्यतया तिदुष्करत्वात् तथा च लौकिकानामाभाणकः अर्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेत् अर्के[illegible]
इष्टस्यार्थस्य संप्राप्तौ को विद्वान्यत्नमाचरेदिति संति चोपायाः शतशः शारीरदुःखप्रतीकाराय सुकराः भिष दृष्टोपाय[illegible]
ग्भिर्वरैरुपदिष्टाः मानसस्यापि तापस्य प्रतीकाराय मनोज्ञस्त्रीपानभोजनविलेपनवस्त्रालंकारविषयप्राप्तिरूपो दित्यमर ३
पायः सुकरः एवं आधिभौतिकस्यापि दुःखस्य नीतिशास्त्राभ्यासकुशलता निरत्ययस्थानाध्यासनादिः प्रतीकार
पि१

यथा १ नि १

हेतुरीषत्करः तथा आधिदैविकस्य दुःखस्य मणिमंत्रौषधाद्युपयोगः सुकरः प्रतीकारोपाय इति निराकरोति नेति कुतः एकांतात्यंत
तोभावात् एकांतो दुःखनिवृत्तेरवश्यंभावः अत्यंतो दुःखस्यानिवृत्तस्य पुनरनुत्पादः तयोरेकांतात्यंतयोरभावः एकांतात्यंत
इति तोभावः षष्ठीस्थाने सार्वविभक्तिकस्तसिः एतदुक्तं भवति यथाविधि रसायनकामिनीनीतिशास्त्राभ्यासमंत्राद्युपयोगे पा ३
पि तस्याध्यात्मिकादेर्दुःखस्य निवृत्तेरदर्शनादनैकांतिकत्वं निवृत्तस्य पुनरुत्पत्तिदर्शनादनात्यंतिकत्वमिति सुक अतः ४
रोप्यैकांतिकात्यंतिकदुःखनिवृत्तेर्न दृष्ट उपाय इति नापार्थिका जिज्ञासेत्यर्थः यद्यपि दुःखममंगलं तथापि तदपघा
तो मंगलमेवेति युक्तम् शास्त्रादौ तत्कीर्त्तनमिति १॥ दृष्टवदानुश्रविकः सह्यविशुद्धिक्षयातिशययुक्तः तद्विपरी
तः श्रेयान्व्यक्ताव्यक्तज्ञविज्ञानात् २ स्यादेतत् माभूत् दृष्ट उपायो वैदिकस्तु ज्योतिष्टोमादिः सहस्रसंवत्सरप
र्यंतः कर्मकलापस्तापत्रयमेकांतमत्यंतं चापनेष्यति श्रुतिश्च स्वर्गकामो यजेतेति स्वर्गश्च यन्न दुःखेन संभिन्नं न च
ग्रस्तमनंतरम् अभिलाषोपनीतं च तत्सुखं स्वः पदास्पदमिति दुःखविरोधी सुखविशेषः स्वर्गः स च स्वसत्तया समूलघात स्व ५
मपहंति दुःखं न चैष क्षयी तथाहि श्रूयते अपाम सोमममृता अभूमेति तस्य कुतो क्षयसंभवः तस्माद्वैदिकस्यो
पायस्य तापत्रयप्रतीकारहेतोर्मुहूर्त्तयामाहोरात्रमाससंवत्सरादिनिर्वर्त्तनीयतयानेकजन्मपरंपरायाससंपादनीयाद्वि
वेकज्ञानादीषत्करत्वात् पुनरपि व्यर्था जिज्ञासेत्याशंक्याह दृष्टवदानुश्रविक इति गुरुपाठादनुश्रूयत इत्यनुश्रवो वे
दः एतदुक्तं भवति श्रूयत एव परं न तु केनचित् क्रियत इति तत्र भव आनुश्रविक इति तत्र प्राप्तो ज्ञात इति यावत् आनुश्रविके २

पि कर्मकलापो ह्यनेन तुल्यो वर्त्तते॥ एकांतिकात्यंतिकदुःखप्रतीकारानुपायत्वस्योभयत्रापि तुल्यत्वात् यद्यपि चानुश्रविक इति सा
मान्याभिधानं तथापि कर्मकलापाभिप्रायं द्रष्टव्यम् विवेकज्ञानस्याप्यानुश्रविकत्वात् तथा च श्रूयते आत्मा वा अरे द्रष्टव्यः प्रकृ
तितो विवेक्तव्यो न स पुनरावर्त्तते न स पुनरावर्त्तते इति अस्याप्रतिज्ञायां हेतुमाह स ह्यविशुद्धिक्षयातिशययुक्तः अविशु
द्धिः सोमादियागस्य पशुबीजादिवधसाधनता यथाह स्म भगवान् पंचशिखाचार्यः स्वल्पः संकरः सपरिहारः सप्रत्यवमर्ष इति
स्वल्पः संकरो ज्योतिष्टोमादिजन्मनः प्रधानापूर्वस्य पशुहिंसादिजन्मनानर्थहेतुनाऽपूर्वेण सपरिहारः शक्यो हि कियता प्रा
यश्चित्तेन परिहर्त्तुं॥ अथ च प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्मविपाकसमये च पच्यते॥ तथापि यावदसावनर्थं
प्रसूते॥ तावत्सप्रत्यवमर्षः प्रत्यवमर्षः सहिष्णुता तया सह वर्त्तत इति सप्रत्यवमर्षः मृष्यन्ते हि पुण्यसंभारोपनीतसुखसुधामहाह्र
दावगाहिनः कुशलाः स्वपापमात्रोपपादितां दुःखवह्निकणिकाम् न च मा हिंस्यात् सर्वभूतानीति सामान्यशास्त्रं विशेषशास्त्रे
ण अग्नीषोमीयं पशुमालभेतेत्यनेन बाध्यत इति युक्तम् विरोधाभावात् विरोधे हि बलीयसा दुर्बलं बाध्यते इति अत्र न वद
कश्चिदस्ति विरोधो भिन्नविषयत्वात् तथा च न हिंस्यादिति हि निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न त्वक्रत्वर्थत्व
मपि अग्नीषोमीयं पशुमालभेतेत्यनेन तु पशुहिंसायाः क्रत्वर्थत्वमुच्यते नानर्थहेतुत्वाभावः तथा सति वाक्यभेदप्रसंगा
त् न चानर्थहेतुत्वक्रतूपकारकत्वयोः कश्चिदस्ति विरोधः सा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्चोपकरिष्यतीति क्षया
तिशयौ च फलगतावप्युपाये उपचरितौ क्षयित्वं च स्वर्गादेः भावत्वे सति कार्यत्वादनुमितम् ज्योतिष्टोमादयः स्वर्ग
मात्रस्य साधनं वाजपेयादयस्तु स्वाराज्यस्येत्यतिशययुक्तत्वम् परसंपदुत्कर्षो हि हीनसंपदं पुरुषं दुःखाकरोति अपा

मृतानां प्रलय १

सां०कौ० नसोमममृता अभूमेतिचामृतत्वाभिधानं चिरस्थानमुपलक्षयति यदाहुराभूतसंप्लवंस्थानममृतत्वंहिभाष्यतेइतिअ
३ तएवचश्रुतिः नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुः॥ परेणनाकंनिहितंगुहायांविभ्राजतेयद्यतयोविशंति तथाक
र्मणामृत्युमृषयोनिषेदुः प्रजावन्तोद्रविणमीहमानाः॥ तथापरेऋषयोमनीषिणः परंकर्मभ्योमृतत्वमानशुरिति॥ तदेतत्सर्व तर
वक्त० मभिप्रेत्याह॥ तद्विपरीतः श्रेयान्व्यक्ताव्यक्तज्ञविज्ञानात्॥ तस्मादानुश्रविकाद्दुःखापघातकोपायात्सोमपानादेरविशुद्धादनि
३ त्यसातिशयफलाद्विपरीतोविशुद्धोहिंसादिसंकराभावात्॥ नित्यनिरतिशयफलोसकृदपुनरावृत्तिश्रुतेः नचकार्यत्वेनानि ति५
त्यताफलस्ययुक्ता॥ भावकार्यस्यतथात्वात् दुःखप्रध्वंसस्यतुकार्यस्यापितद्विपरीत्यात् नचदुःखान्तरोत्पादः॥ कारणप्रव
त्तौकार्यानुत्पादात्॥ विवेकज्ञानोपजननपर्यन्तत्वाच्चकारणप्रवृत्तेः॥ एतच्चोपरिष्टादुपपादयिष्यते॥ श्रवतरार्थस्तुतस्मादा
नुश्रविकाद्दुःखापघातकाद्धेतोर्विपरीतः सत्वपुरुषान्यताप्रत्ययसाक्षात्कारोदुःखापघातकोहेतुः॥ अतएवश्रेयान्प्र
शस्यतरः॥ आनुश्रविकोहिवेदविहितत्वान्मात्रयादुःखापघातकत्वाच्चप्रशस्यः॥ सत्वपुरुषान्यताप्रत्ययोपिप्रशस्यस्त शेरप्रत्यय
दनयोः प्रशस्ययोर्मध्येसत्वपुरुषान्यताप्रत्ययः श्रेयान्॥ कुतः पुनरस्योत्पत्तिरित्यतउक्तं॥ व्यक्ताव्यक्तज्ञविज्ञानादिति॥
व्यक्तंचाव्यक्तंचज्ञश्चतेव्यक्ताव्यक्तज्ञाः॥ तेषांविज्ञानंविवेकेनज्ञानम्॥ व्यक्तज्ञानपूर्वकमव्यक्तस्यतत्कारणस्यज्ञानं तयोःप ए५
रार्थ्येनात्मापरोज्ञायते॥ इतिक्रमेणाभिधानं॥ एतदुक्तंभवति॥ श्रुतिस्मृतीतिहासपुराणेभ्योव्यक्तादीन्विवेकेनश्रुत्वाशास्त्र
युक्त्याचव्यवस्थाप्यदीर्घकालादरनैरन्तर्यसत्कारसेवितात्भावनामयाद्विज्ञानादिति॥ तथाचवक्ष्यति एवंतत्वाभ्यासान्नास्मि
नमेनाहमित्यपरिशेषं अविपर्ययाद्विशुद्धंकेवलमुत्पद्यतेज्ञानमिति २ तदेवंप्रेक्षावदपेक्षितार्थत्वेनशास्त्रारंभंसमाधाय
शास्त्रमारभमाणः श्रोतृबुद्धिसमवधानायतदर्थंसंक्षेपतः प्रतिजानीते मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः
सप्तषोडशकस्तुविकारोनप्रकृतिर्नविकृतिः पुरुषः ३ संक्षेपतोहिशास्त्रार्थस्यचतस्रोविधाः कश्चिदर्थः प्रकृतिरेवकश्चिद्विकृ ३

म२

प्रमीयतेऽने नेति प्रमाणं

अप्रसंगः ३

तिविकृतिरेव कश्चित्प्रकृतिविकृतिरेव कश्चिदनुभयरूपः तत्र का प्रकृतिरेवेत्यत उक्तं मूलप्रकृतिरविकृतिः प्रकरोतीति प्रकृतिः प्रधानं सत्त्व
रजस्तमसां साम्यावस्था साऽविकृतिः प्रकृतिरेवेत्यर्थः कस्मादित्यत उक्तं मूलेति मूलं चासौ प्रकृतिश्चेति मूलप्रकृतिः विश्वस्य कार्यसंघा
तस्य सा मूलम् न त्वस्या मूलान्तरमस्ति अनवस्थाप्रसंगात् न चानवस्थायां प्रमाणमस्तीति भावः कतमाः पुनः प्रकृतिविकृतयः किं
घाः प्रकृतिविकृतयः सप्त॥ प्रकृतयश्च ता विकृतयश्चेति। प्रकृतिविकृतयः सप्त॥ तथा हि महत्तत्त्वमहंकारस्य प्रकृति
र्विकृतिश्च मूलप्रकृतेः एवमहंकारतत्त्वं तन्मात्राणामिन्द्रियाणां च प्रकृतिर्विकृतिश्च महतः एवं पंचतन्मात्राणि भूतानामाकाशा
दीनां प्रकृतयो विकृतयश्चाहंकारस्य अथ का विकृतिरेव कियती चेत्यत उक्तं षोडशकस्तु विकार इति षोडशसंख्यापरिमितो गणः
षोडशकः तुशब्दो अवधारणे भिन्नक्रमः पञ्चभूतानि एकादशेन्द्रियाणीति षोडशको गणो विकार एव न प्रकृतिः यद्यपि पृथिव्या
दीनामपि गोघटवृक्षादयो विकाराः एवं तद्विकारभेदानां पयोबीजादीनां दध्यङ्कुरादयस्तथापि गवादयो बीजादयो वा न पृथि
व्यादिभ्यस्तत्त्वान्तरं तत्त्वान्तरोपादानत्वं च प्रकृतित्वमिहाभिप्रेतमिति न दोषः सर्वेषां गोघटादीनां स्थूलतेन्द्रियग्राह्यता च सम
ति न तत्त्वान्तरम् अनुभयरूपमाह न प्रकृतिर्न विकृतिः पुरुष इति एतत्सर्वमुपपादयिष्यते ३ तमिममर्थं प्रामाणिकं कर्तुम
भिमताः प्रमाणभेदा लक्षणीयाः न च सामान्यलक्षणमन्तरेण शक्यं विशेषलक्षणं कर्तुमिति प्रमाणसामान्यं तावल्लक्षयति
दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ४ प्रमाणमिष्टमिति अत्र च
प्रमाणमिति समाख्या लक्ष्यपदं तन्निर्वचनं च लक्षणम् प्रमीयतेऽनेनेति प्रमाणं इति निर्वचनात् प्रमां प्रतिकरणत्वं गम्यते अ
संदिग्धाविपरीतानधिगतविषया चित्तवृत्तिर्बोधश्च पौरुषेयः फलं प्रमा तत्साधनं प्रमाणमिति एतेन संशयविपर्ययस्मृति
साधनेष्वप्रसंगः संख्याविप्रतिपत्तिं निराकरोति त्रिविधमिति तिस्रो विधा अस्य प्रमाणसामान्यस्येति तत्त्रिविधम्
न न्यूनं नाप्यधिकमित्यर्थः विशेषलक्षणानन्तरं चैतदुपपादयिष्यते कतमाः पुनस्ता विधा इत्यत आह दृष्टमिति एतच्च
लौकिकप्रमाणमभिप्रायमिति लोकव्युत्पादनार्थं त्वाच्छास्त्रस्य तस्यैवात्राधिकारात् आर्षं तु विज्ञानं योगिनां न लोक

लौकिकप्रमाणस्य। योगाभ्यासजन्यं।

समानजातीयेऽनुमानाप्तवचने असमानजातीयास्स्मृतिसंशयविपर्ययकालेऽपि [illegible]

कां० कौ० ४ चत्वारस्तावत्त्वमिति सदपि नाभिहितमनधिकारात् स्यादेतन्मा भून्न्यूनमधिकं तु कस्मान्न भवति संगिरन्ते हि प्रतिवादिन उपमानादीन्यपि प्रमाणानीत्यत आह सर्वप्रमाणसिद्धत्वात् एष्वेव दृष्टानुमानाप्तवचनेषु सर्वेषां प्रमाणानां सिद्धत्वादन्त-
५ र्भावादित्यर्थः एतच्चोपपादयिष्यत इत्युक्तम् अथ प्रमेयव्युत्पादनाय प्रवृत्तं शास्त्रं कस्मात्सामान्यतो विशेषतश्च प्रमाणं ल-
क्षयतीत्यत आह प्रमेयसिद्धिः प्रमाणाद्धीति सिद्धिः प्रतीतिः। सेयमार्यार्थक्रमानुरोधेन पाठक्रममनादृत्य व्याख्याता ४ संप्रति
प्रमाणविशेषलक्षणावसरे प्रत्यक्षस्य प्रमाणेषु ज्येष्ठत्वात्तदधीनत्वाच्चानुमानादीनां सर्ववादिनामविप्रतिपत्तेश्च तदेव
तावल्लक्षयति प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु ५ अत्र
दृष्टमिति लक्ष्यनिर्देशः परिशिष्टं लक्षणम् समानासमानजातीयव्यवच्छेदो लक्षणार्थः अवयवार्थस्तु विषिण्वन्ति
विषयिणमनुबध्नन्ति स्वेन रूपेण निरूपणीयं कुर्वन्तीति यावत् विषयाः पृथिव्यादयः सुखादयश्चास्मदादीनामविषयाश्च
तन्मात्रलक्षणा योगिनामूर्ध्वस्रोतसां च विषयाः विषयं विषयं प्रति वर्तत इति प्रतिविषयमिन्द्रियम् वृत्तिश्च सन्निकर्षः अर्थ-
सन्निकृष्टमित्यर्थः तस्मिन्नध्यवसायस्तदाश्रित इत्यर्थः अध्यवसायश्च बुद्धिव्यापारो ज्ञानम् उपात्तविषयाणामिन्द्रियाणां
वृत्तौ सत्यां बुद्धेस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसाय इति वृत्तिरिति च ज्ञानमिति चाख्यायते इदं तत्प्रमाणम् अ- प्रत्यक्षप्रमा [illegible]
प्रकृतिकार्यत्वात् नेन यश्चेतनाशक्तेरनुग्रहस्तत्फलं प्रमा बोधः बुद्धितत्त्वं हि प्राकृतत्वादचेतनमिति तदीयोऽध्यवसायोऽप्यचेतनो घटादिवत्
एवं हि बुद्धितत्त्ववर्त्तिना ज्ञानसुखादिना तत्प्रतिबिम्बितस्तच्छायापत्त्या ज्ञानसुखादिमानिव भवतीति चेतनोऽनुगृह्यते चिति-
च्छायापत्त्या चाचेतनापि बुद्धिस्तदध्यवसायोऽप्यचेतनश्चेतन इव भवतीति तथा च वक्ष्यति तस्मात्तत्संयोगादचेतनं चे-
तनावदिव लिङ्गम् गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीन इति अत्राध्यवसायग्रहणेन संशयं व्यवच्छिनत्ति संशय-
स्यानवस्थितग्रहणेनानिश्चितरूपत्वात् निश्चयोऽध्यवसाय इति चानर्थान्तरम् विषयग्रहणेनासद्विषयं विपर्ययमपाकरोति। ४

बुद्धितत्त्वस्य सुखादयोऽपि परिणामभेदा अचेतनाः पुरुषस्तु सुखाद्य[illegible]ननुषङ्गी चेतनः सोऽयं ४।५।

प्रतिग्रहणेनचेन्द्रियार्थसन्निकर्षसूचनादनुमानस्मृत्यादयस्त्र्यापाकृता भवंति तदेवं समानासमानजातीयव्यवच्छेदक-
त्वात्प्रतिविषयाध्यवसाय इति दृष्टस्य संपूर्णं लक्षणम् लक्षणांतराणि च तैर्थिकानां न भूषितानि च न दूषितानि वि-
स्तारभयादिति नानुमानं प्रमाणमिति वदतो लौकायतिकेनाप्रतिपन्नः संदिग्धो विपर्यस्तो वा पुरुषः कथं प्रतिपाद्येत प्रमसन्दैव
तत्र च पुरुषान्तरगताज्ञानसन्देहविपर्ययाः शक्या अर्वाग्दृशा प्रत्यक्षेण प्रतिपत्तुम् नापि मानान्तरेणानभ्यु- स्वीकृतत्वा
पगमात् अनवधृताज्ञानसंशयविपर्यस्तु यं कंचित्पुरुषं प्रति प्रवर्त्तमानो नवधेयवचनतया प्रेक्षावद्भिरुन्म- त्
त्तवदुपेक्ष्येत तदनेनाज्ञानादयः परपुरुषवर्त्तिनोभिप्रायभेदाद्वचनभेदाल्लिङ्गादनुमातव्या इत्यकामेनाप्यनुमानं प्रमा-
णमभ्युपेयम् तत्र प्रत्यक्षकार्यत्वादनुमानं प्रत्यक्षानंतरं लक्षणीयम् तत्रापि सामान्यलक्षणपूर्वकत्वाद्विशेषलक्षणस्यानु-
मानसामान्यं तावल्लक्षयति तल्लिंगलिंगिपूर्वकमिति लिंगं व्याप्यम् लिंगि व्यापकम् शंकितसमारोपितोपाधिनिराक-
रणेन स्वभावप्रतिबद्धं व्याप्यं येन प्रतिबद्धं तत् व्यापकम् लिंगलिंगिग्रहणेन विषयवाचिना विषयिणं प्रत्ययमुपलक्षयति
धूमादिर्व्याप्यो वह्न्यादिर्व्यापक इति यः प्रत्ययस्तत्पूर्वकम् लिंगिपदं चानुवर्त्तनीयम् तेन लिंगमस्यास्तीति पक्षधर्मताज्ञान-
मपि दर्शितं भवति तत् व्याप्यव्यापकपक्षधर्मताज्ञानपूर्वकमनुमानमित्यनुमानसामान्यं लक्षितम् अनुमानविशेषांस्तंत्रा-
न्तरलक्षितानभिमतान्स्मारयति त्रिविधमनुमानमाख्यातं तदिति तत्सामान्यतो लक्षितं विशेषतस्त्रिविधम् पूर्ववत् शे-
षवत् सामान्यतो दृष्टं चेति तत्र प्रथमं तावद्द्विविधमनुमानं वीतमवीतं च अन्वयमुखेन प्रवर्त्तमानं विधायकं वीतम् व्य-
तिरेकमुखेन प्रवर्त्तमानं निषेधकमवीतम् तत्रावीतं शेषवत् शिष्यते परिशिष्यते इति शेषः स एव विषयतया यस्यास्त्य-
नुमानस्य तच्छेषवत् यथाहुः प्रसक्तप्रतिषेधे न्यत्राप्रसंगाच्छिष्यमाणे संप्रत्ययः परिशेष इति अस्य चावीतस्य व्यति-
रेकिण उदाहरणमग्रेऽभिधास्यते इति वीतं च द्वेधा पूर्ववत् सामान्यतो दृष्टं च तत्रैकं दृष्टस्वलक्षणसामान्यविषयकं यत्त-

रूपादिज्ञानरूपा क्रिया सकरणा क्रियात्वात् छिदादिवत् ४
त्वे

सां° कौ° पूर्ववत् पूर्वं प्रसिद्धं दृष्टस्वलक्षणसामान्यमिति यावत् तदस्य विषयत्वेनास्त्यनुमानज्ञानस्येति पूर्ववत् यथा धूमाद्वह्नि
५ त्वसामान्यविशेषः पर्वतेऽनुमीयते इति तस्य वह्नित्वस्य सामान्यस्य स्वलक्षणं वह्निविशेषो दृष्टो रसवत्याम् अपरं
च वीतं सामान्यतो दृष्टम् अदृष्टस्वलक्षणसामान्यविषयकमनुमानम् यथेन्द्रियविषयमनुमानम् अत्र हि रूपादिज्ञा
५ नानां क्रियात्वेन करणवत्त्वमनुमीयते यद्यपि च करणत्वसामान्यस्य छिदादौ वास्यादि स्वलक्षणमुपलब्धं तथापि
यज्जातीयं रूपादिज्ञाने करणमनुमीयते तज्जातीयस्य करणस्य न दृष्टं स्वलक्षणं प्रत्यक्षेण इन्द्रियत्वजातीयं
हि तत्करणं न चेन्द्रियत्वस्य सामान्यस्य स्वलक्षणम् इन्द्रियं प्रत्यक्षगोचरोऽर्वाग्दृशाम् यथा वह्नित्वसामान्यस्य स्व
लक्षणं वह्निः सोऽयं पूर्ववतः सामान्यतोदृष्टात् सत्यपि वीतत्वेन तुल्यत्वे विशेषः अत्र च दृष्टं दर्शनं सामान्यत इति सामान्यस्य
सार्वविभक्तिकस्तसिः अदृष्टस्वलक्षणस्य सामान्यस्य दर्शनमनुमानमित्यर्थः सर्वं चैतदस्माभिर्न्यायवार्तिकतात्पर्य समनंतरं
टीकायां व्युत्पादितमिति नेह प्रतन्यते विस्तरभयादिति प्रयोजकवृद्धशब्दश्रवणसमनंतरं प्रयोज्यवृद्धप्रवृत्तिहेतुकज्ञाना
नुमानपूर्वकत्वाच्छब्दार्थसंबंधग्रहणस्य स्वार्थसंबंधज्ञानसहकारिणश्च शब्दस्यार्थप्रत्यायकत्वादनुमानपूर्वकत्व
मित्यनुमानानंतरं शब्दं लक्षयति आप्तश्रुतिराप्तवचनं तु इति आप्तवचनमिति लक्ष्यनिर्देशः परिशिष्टं तु लक्षणम्
आप्ता प्राप्ता युक्तेति यावत् आप्ता चासौ श्रुतिश्चेति आप्तश्रुतिः श्रुतिर्वाक्यजनितं वाक्यार्थज्ञानम् तच्च स्वतः प्रमाणम्
अपौरुषेयवेदवाक्यजनितत्वेन सकलदोषशंकाविनिर्मुक्तं युक्तं भवति एवं वेदमूलस्मृतीतिहासपुराणवाक्यजनि
तमपि ज्ञानं युक्तम् आदिविदुषश्च कपिलस्य कल्पादौ कल्पांतराधीतश्रुतिस्मरणसंभवः सुप्तप्रतिबुद्धस्येव पूर्वेद्यु
रवगतानामर्थानामपरेद्युः तथा चावट्यजैगीषव्ययोः संवादे भगवान् जैगीषव्यः संवादे भगवान् जैगीषव्यो दशम ५

प्रयोजकवृद्धः प्रेष्यवृद्धस्तु मध्यमवृद्धः प्रवृत्तिर्या प्रवृत्तिहेतुर्यस्य ज्ञानस्य तत् तेन ज्ञानेन यदनुमानं तत्पूर्वकत्वाच्छब्दार्थसंबंधग्रहणस्य विमतः शब्दः स्वार्थसंबंधवान्
भवितुमर्हति प्रवृद्धधीरेयं फलपर्यंतप्रवृत्तिनिमित्तत्वात् [illegible] कारणं यद्ज्ञानं तत्पूर्वकत्वात् अस्मिन्पदे
प्रयोगः विमता प्रयोज्यवृद्धप्रवृत्तिः शब्दार्थसंबंधज्ञानपूर्विका [illegible] विशेषफलवर्तित्वात् [illegible] संप्रतिपन्नवदिति

क्रोयधर्मोवाक्यः ६ ॥ निस्तार २

तावत्वर्त्ति जन्मसमरणमात्मानउवाचेदशास्त्रमहाकल्पेषु विपरिवर्तमानेन्मयेतानि संदर्शिता ग्रंथग्रहणेन चायुक्ताः
शाक्यभिक्षु निर्ग्रंथक संसारमोचकादीनामागमाभासाः परिहृता भवंति अयुक्तत्वं च तेषां विगानात् विच्छिन्नमूलत्वा
त्प्रमाणविरुद्धार्थाभिधानात् केश्चिदेव म्लेच्छादिभिः पुरुषापशुप्रायैः परिग्रहात् इत्येवमादेस्तु शब्दस्यानुमाना
न्तर्भावेऽपि वाक्यार्थो हि प्रमेयो न तु तद्धर्मो वा कोऽपि न सत्वं लिंगं भवेत् न च वाक्यं वाक्यार्थबोधकं संबंधग्र
हणमपेक्षते अभिनवकविरचितस्य वाक्यस्यादृष्टसंबंधस्यापि अनुभूतचरवाक्यार्थबोधकत्वादिति एवं प्रमाणसामा
न्यलक्षणमुक्तं द्विविधं लक्षणं तु चेत् सत्सु यानि प्रमाणांतराणि उपमानादीनि प्रतिवादिभिरभ्युपेयंते तान्युक्तलक्ष
णक्षेव प्रमाणेष्वंतर्भवंति तथाहि उपमानं तावद् यथा गौस्तथा गवय इति वाक्यात् तज्ञानिता थीरागम एव योऽय
मंगवयशब्दो गोसदृशस्य वाचक इति प्रत्ययः सोऽप्यनुमानमेव यो हि शब्दो यत्र वृद्धैः प्रयुज्यते सोऽसति वृत्त्यंतरे
तस्य वाचकः यथा गोशब्दो गोत्वस्य प्रयुज्यते चायं गवयशब्दो गोसदृश इति तस्य वाचक इति ज्ञानमनुमानमेव य
द्गवयस्य चक्षुःसंनिकृष्टस्य गोसादृश्यज्ञानं तत्प्रत्यक्षम् अत एव च स्मर्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षम्
न ह्यन्यद्गवि सादृश्यमन्यच्च गवये अपि च यद् सामान्ययोगो जात्यंतरवर्तीजात्यंतरसादृश्यमुच्यते सामान्ययोग
श्चैकः स चेद्गवये प्रत्यक्षो गव्यपि तथेति नोपमानस्य प्रमेयांतरमस्ति यत्र प्रमाणांतरं भवेदिति न प्रमाणांतरमुप
मानमिति एवमर्थापत्तिरपि न प्रमाणांतरम् तथाहि जीवतश्चैत्रस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्प
नमर्थापत्तिरभिमता सा च नामानुमानमेव यदा खलु अव्यापकः सन्नेकत्र नास्ति तदान्यत्रास्ति यदा व्यापक एक

विमतश्चैत्रो बहिर्भवितुमर्हति जीवतत्वे सति गृहेऽविद्यमानत्वात् नय
एवं न स एवं यथा गृहे विद्यमानो ... तथैव सन्नुमानं १

विमतो ग्राचयप्र शब्दे गोसदृशपथवाचकत्वेन ...

ननु यदि प्रमाणेन निश्चितमेव लिंगं तर्हि गृहाभावस्य चैत्रस्य पदप्राप्तं गृहसत्त्वं निराकुर्वद् सर्वत्र सत्त्वमपि प्रतिक्षेप्स्यति संदिग्धत्वमपि गृहस्य सत्त्वापने स्यातीति
चेत्तत्राह नापीति । सत्त्वस्यापि स्वविषयानुमानप्रमाणेनाध्यवसितत्वेन प्रबलत्वात् प्रतिक्षेपायोगात् गृहासत्त्वेनेत्यर्थः । ६

इति जाते – १

सां० को० आस्ति तदान्यत्र नास्तीति सुवारः स्वशरीरव्याप्तिग्रहस्य यावत् सतो गृहाभावदर्शनेन लिंगेन बहिर्भावदर्शनमनुमानमेव
न च चैत्रस्य बहिः सत्त्वेन गृहाभावः शक्योपहोतुं येनासिद्धो गृहाभावो बहिर्भावे न हेतुः स्यात् न च गृहस्यादेन वा
सत्त्वमपहूयते येन सत्त्वमेवानुपपद्यमानमात्मानं न बहिः स्वस्यापयेत् तथा हि चैत्रस्य गृहासत्त्वेन सत्त्वमात्रं विरुध्य
ते गृहे सत्त्वं वा न तावद्यत्किंचन सत्त्वस्यास्ति विरोधो गृहासत्त्वेन भिन्नविषयत्वात् देशसामान्येन गृहविशेषापेक्षया वि
पाक्षिक इति समानविषयतया विरोध इति चेन्न प्रमाणनिश्चितस्य गृहासत्त्वस्य पाक्षिकतया संशयिकेन गृहे सत्त्वेन
प्रतिक्षेपायोगात् नापि प्रमाणनिश्चितो गृहाभावः पाक्षिकमस्य गृहे सत्त्वं प्रतिक्षिपन्न सत्त्वमपि प्रतिक्षेप्तुं सांशयिक
त्वं वापनेतुमर्हतीति । पुरुषम् गृहावच्छिन्नेन चैत्राभावेन गृहसत्त्वं विरुद्धत्वात् प्रतिक्षिप्यते न तु सत्त्वमात्रम् तस्य तत्रौदासी
न्यात् तस्माद् गृहाभावेन लिंगेन सिद्धेन सतो बहिर्भावोऽनुमीयत इति युक्तम् एतेन विरुद्धयोः प्रमाणयोरविरोधापादने वि
षयव्यवस्थयार्थापत्तेर्विषय इति निरस्तं अवच्छिन्नानवच्छिन्नयोर्विरोधाभावात् उदाहरणान्तराण्यर्थापत्तेरनुमानेऽन्तर्भाव
नीयानि तस्मान्न प्रमाणान्तरमर्थापत्तिरिति सिद्धम् एवमभावोऽपि प्रत्यक्षमेव न हि भूतलस्य परिणामविशेषात्कैवल्यलक्षणाद्
घटाभावो नाम प्रतिक्षणपरिणामिनो हि सर्व एव भावा ऋते चितिशक्तेः स च परिणामभेद ऐन्द्रियक इति नास्ति प्रत्यक्षानवरुद्धो
विषयो यत्राभावाख्यं प्रमाणं तरमभ्युपेयमिति संभवस्तु यथा खार्यां द्रोणाढकप्रस्थाद्यवगमः स चानुमानमेव खारीत्वं द्रो
णाद्यविनाभूतं प्रतीतं खार्यां द्रोणादिसत्त्वमवगमयतीति यच्चाद्यं वदन्ति इह वटे यक्षः प्रतिवसतीति न तत्प्रमाणमनिर्दिष्टवक्तृकत्वेन सांशयिकत्वात् आप्तवक्तृकत्वनिश्चये त्वागम इत्युपपन्नं त्रि ६

विमतः संभवोऽनुमानेऽन्तर्भावबलेनार्थप्रतिपत्तिहेतुकत्वात् संप्रतिपन्नानुमानवत् । २

... विल्वादकुड ... शारीरशिकेतियथोत्तरचतुर्णां । ३

विध्वंसप्रमाणमिति ५ एवं तावद्व्यक्ताव्यक्तज्ञलक्षणप्रमेयसिद्ध्यर्थं प्रमाणानि लक्षितानि तत्र व्यक्तं पृथिव्यादि स्वरूपतः पाद
योपललोष्टपाषाणलनीपांशुलपादा हालिका अपि प्रत्यक्षतः प्रतिपद्यते पूर्ववता चानुमानेन धूमादिदर्शनाद् वह्न्यादीनि
तद्व्युत्पादनायेदं प्रायोगनं शास्त्रमिति दुरधिगमम् अनेन व्युत्पाद्यम् तत्र यस्य प्रमाणस्य यत्र सामर्थ्यं तदुक्तं प्रमाणेष्वेवानि दर्श
दर्शयति सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धम् ६ तु श
ब्दः प्रत्यक्षपूर्ववद्भ्यां विशिनष्टि सामान्यतो दृष्टादध्यवसायादनुमानादतीन्द्रियाणां प्रधानपुरुषादीनां प्रतीतिः चिति
च्छायापत्तिर्बुद्धेरध्यवसाय इत्यर्थः उपलक्षणं चैतत् शेषवत इत्यपि द्रष्टव्यम् तत् किं सर्वेष्वतीन्द्रियेषु सामान्यतो दृष्ट
मेव प्रवर्तते तथा च यत्र तन्नास्ति महदाद्यारम्भक्रमे स्वर्गापूर्वदेवतादौ च तेषाममावः प्राप्त इत्यत आह तस्मादपि
ता० चासिद्धं परोक्षमाप्तागमात्सिद्धमिति तस्मादपीत्यर्थवतेव सिद्धं चकारात् शेषवत इत्यपि समुच्चितमिति ६ सादेतत्
यथा गगनकुसुमकूर्मरोमनरविषाणादिषु प्रत्यक्षमप्रवर्तमानं तदभावमवगमयति एवं प्रधानादिष्वपि तत्कथं ते नाद
षां सामान्यतो दृष्टादिभ्यः सिद्धिरित्यत आह अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् सौक्ष्म्याद्व्यवधानाद
भिभवात्समानाभिहाराच्च ७ अनुपलब्धिरिति वक्ष्यमाणे सिंहावलोकितन्यायेनानुषञ्जनीयम् यथा उत्पतन्वियति
पतत्री अतिदूरतया सन्नपि प्रत्यक्षेण नोपलभ्यते सामीप्यादित्यत्राप्यनुपलब्धिरनुषञ्जनीया यथा लोचनस्थमञ्जनमति सामी
प्यान्न दृश्यते इन्द्रियघातो अन्धत्वबधिरत्वादिः मनोऽनवस्थानात् यथा कामाद्युपहतमनाः स्फीतालोकवर्तिनमिन्द्रियस
न्निकृष्टमर्थं न पश्यति सौक्ष्म्यात् यथेन्द्रियसन्निकृष्टं परमाण्वादि प्रणिहितमना अपि न पश्यति व्यवधानात् यथा

सां० कौ० कुड्यादिव्यवहितं राजदारादि न पश्यति अभिभवात् यथाहनि सौरीभिर्भाभिरभिभूतं ग्रहनक्षत्रमण्डलं न पश्यति समानाभिहा
७ रात् यथा तोयदविमुक्तानुदबिन्दून् जलाशये न पश्यति चकारोऽनुक्तसमुच्चयार्थः तेनानुद्भवोऽपि संगृहीतः तद्यथा क्षीराद्य
वस्थायां दध्याद्यनुद्भवान्न दृश्यते एतदुक्तं भवति न प्रत्यक्षनिवृत्तिमात्राद्वस्त्वभावो भवति अतिप्रसङ्गात् तथा हि गृहा
द्विनिर्गतो गृहजनमपश्यंस्तदभावं विनिश्चिनुयात् अपि तु योग्यप्रत्यक्षनिवृत्तेरयमभावं विनिश्चिनोति न च प्रधानपुरुषा
दीनामस्ति प्रत्यक्षयोग्यतेति तन्निवृत्तिमात्रान्न तदभावनिश्चयो युक्तः प्रामाणिकानामिति ७ कतमत्पुनरेषु कारणं प्रधाना
दीनामनुपलब्धावित्यत आह सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च
८ प्रधानाभावादेव सप्तमरसवत्तेषामनुपलब्धिः कस्मान्न भवतीत्यत आह नाभावात् कुतः कार्यतस्तदुपलब्धेः तदिति प्रधा
नं परामृशति पुरुषोपलब्धौ तु प्रमाणं वक्ष्यति संघातपरार्थत्वादिति इतरप्रमाणावधारिते हि प्रत्यक्षमप्रवर्तमानमयो
ग्यत्वान्न प्रवर्तत इति कल्प्यते सप्तमरसस्तु न प्रमाणेनावधारित इति न तत्र प्रत्यक्षायोग्यता शक्या व्यवस्थापयितुमिति प्रायः हेतोः
किं पुनस्तत्कार्यं यतः प्रधानानुमानमित्यत आह महदादि तच्च कार्यम् एतच्च यथागमकं तथोपरिष्टादुपपादयिष्यते तस्य च का
र्यस्य विवेकज्ञानोपयोगिनी सारूप्यवैरूप्ये आह प्रकृतिसरूपं विरूपं च एते उपरिष्टाद्विभजनीये इति ८ असदकरणादुपा
दानग्रहणात्सर्वसंभवाभावात् शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम् ९ कार्यं कारणमात्रं गम्यते सति च ह वा
बौद्धाः२ दिनां विप्रतिपत्तयः केचिदाहुरसतः सज्जायते बौद्धाः एकस्य सतो विवर्तः कार्यजातं न वस्तु सदित्यपरे अन्ये तु सतोऽसज्जायते सांख्याः सतः स न्यायकौ ३
ज्जायत इति वृद्धाः तत्र पूर्वस्मिन्विकल्पत्रये प्रधानं न सिध्यति सुखदुःखमोहभेदवच्छब्दाद्यात्मकं हि जगत्कारणस्य
प्रधानत्वं सत्त्वरजस्तमःस्वभावकत्वं कल्पयति यदि पुनरसतः सज्जायेत इत्यसन्निरुपाख्यं कारणं सुखादिरूपाघा ७

त्मकं कथं स्यात् सदसतोस्तादात्म्यानुपपत्तेः अथ सतो विवर्तः शब्दादिप्रपंचस्तथापि सतः सज्जायते इति न स्यात् न च
तस्माद्द्वयस्य प्रपंचात्मकत्वमपि तु अप्रपंचस्य प्रपंचात्मकतया प्रतीतिर्भ्रम एव यथामविकल्पादाहुश्चरणादीनां सत
एवं कारणादसतो जन्म तेषामपि सदसतोरेकत्वानुपपत्तेर्न कार्यात्मकं कारणमिति न प्रधानसिद्धिः अतः प्रधानसिद्ध्य
र्थं प्रथमं तावत्सत्कार्यं प्रतिजानीते सत्कार्यम् कारणव्यापारात्प्रागिति शेषः तथा च नासिद्धसाधनं नैयायिकतनयैरु
ज्जीवनीयम् यद्यपि च बीजमृत्पिण्डादिप्रध्वंसानन्तरमंकुरघटाद्युत्पत्तिरुपलभ्यते तथापि न प्रध्वंसस्य कारणत्वमपि
वद तु भावस्यैव बीजाद्यवयवस्य अभावाद्भावोत्पत्तौ तस्य सर्वत्र सुलभत्वात् सर्वदा सर्वकार्योत्पादप्रसंग इत्यादिन्यायवा
र्त्तिकतात्पर्यटीकायामभिहितमस्माभिः प्रपंचप्रत्ययश्चासति बाधके न शक्यो मिथ्येति वदितुमिति कणभक्षाक्षच
रणमतम् अवशिष्यते तत्रेदं प्रतिज्ञातं सत्कार्यमिति अत्र हेतुमाह असदकरणात् असच्चेत्कारणव्यापारात्पूर्वं कार्यं
नास्य सत्त्वं कर्तुं केनापि शक्यम् नहि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं शक्यते सदसत्त्वे घटस्य धर्माविति चेत् तथाप्यस
ति धर्मिणि न तस्य धर्म इति सत्त्वं तदवस्थमेवेति न सत्त्वम् असंबद्धेनातदात्मना चासत्त्वेन कथमसन् तस्मात्कारणव्या
कार्यस्य ४ पारादूर्ध्वमिव ततः प्रागपि सदेव कार्यमिति कारणाच्चास्य सतोऽभिव्यक्तिरवशिष्यते सतश्चाभिव्यक्तिरुपपन्ना यथा घटः॥
पीडनेन तिलेषु तैलस्य अवघातेन धान्येषु तण्डुलानां दोहनेन सौरभेयीषु पयसः असतः करणे तु न निदर्शनं किंचि
दस्ति न खल्वभिव्यज्यमानं चोत्पद्यमानं वा क्वचिदसद्दृष्टम् इतश्च कारणव्यापारात्प्राक् सदेव कार्यमित्याह उपादा
नग्रहणात् उपादानानि कारणानि तेषां ग्रहणं कार्येण संबंधः उपादानैः कार्यस्य संबंधादिति यावत् एतदुक्तं भवति

सर्वस्मात्सर्वकार्यजातं न भवति २ कारणेन कार्यं २ सामान्येन २

सां०कौ० कार्यात्संबद्धं कारणं कार्यजनकम् संबंधश्च कारणैः कार्यस्यासतो न संभवतीति तस्मात्सदिति स्यादेतत् असंबद्धमेव कारणैः कार्यं
८ कस्मान्न जन्यते तथा चासदेवोत्पत्स्यते इत्यत आह सर्वसंभवाभावात् असंबद्धस्य जन्यत्वे असंबद्धत्वाविशेषेण सर्वं कार्य
४ जातं सर्वस्माद्भवेत् न चैतदस्ति तस्मात् संबद्धेन संबद्धं जन्यते यथाहुः सांख्यवृद्धाः असत्त्वे नास्ति संबंधः कारणैः सत्त्वसं
गिभिः असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिरिति स्यादेतत् असंबद्धमपि तदेव करोति यत्र यत्कारणं शक्तं शक्ति
सर्वस्मात्सर्वं श्च कार्यदर्शनादवगम्यते तेन नाव्यवस्थेत्यत आह शक्तस्य शक्यकरणात् सा शक्तिः शक्तकारणाश्रया सर्वत्र वा स्या
कार्यं भवति इति त् शक्ये वा सर्वत्र चेत्तदवस्थैवाव्यवस्था शक्ये चेत्कथमसति शक्ये तत्रेति वक्तव्यम् शक्तिभेद एव तादृशो यतः किंचिदेव
तिर्ह कार्यं जनयेत् न सर्वमिति चेत् हंत भोः शक्तिविशेषः कार्यसंबद्धो ऽसंबद्धो वा संबद्धत्वे नासता संबंध इति सत्कार्यम् असं
हेतोरिति हर्षे १ बद्धत्वे सैवाव्यवस्थेति सुष्ठूक्तं शक्तस्य शक्यकरणादिति इतश्च सत्कार्यमित्याह कारणभावाच्च कार्यस्य कारणात्म
कत्वात् नहि कारणाद्भिन्नं कार्यम् कारणं च सदिति कथं तदभिन्नं कार्यमसद्भवेत् कार्यस्य कारणाभेदसाधनानि प्रमाणा
नि न पटस्तन्तुभ्यो भिद्यते तंतुधर्मत्वात् इह यद्यतो भिद्यते तत्तस्य धर्मो न भवति यथा गौरश्वस्य न धर्मः धर्मश्च पटस्तंतू
नाम् तस्मान्नार्थान्तरम् उपादानोपादेयभावाच्च नार्थान्तरत्वं तंतुपटयोः ययोरर्थान्तरत्वं तयोर्नोपादानोपादेयभावः अत्र हेतुः
यथा घटपटयोः उपादानोपादेयभावश्च तंतुपटयोः तस्मान्नार्थान्तरत्वमिति इतश्च नार्थान्तरत्वं तंतुपटयोः संयोगाप्रा तन्तुपटयोः
प्त्यभावात् अर्थान्तरत्वे हि संयोगो दृष्टो यथा कुंडबदरयोः अप्राप्तिर्वा यथा हिमवद्विंध्ययोः न चेह संयोगाप्राप्ती तस्मान्ना
स्वस्तिकस्य बलेर र्थान्तरं गृह्यते यथैकपलकस्य स्वस्तिकस्य यो गुरुत्वकार्योऽवनतिविशेषः ततो द्विपलकस्य स्वस्तिकस्य गुरुत्वकार्योऽवनतिभेदो
ऽधिकः न च तथा तंतुगुरुत्वकार्यात्पटगुरुत्वकार्यान्तरं दृश्यते तस्मादभिन्नस्तंतुभ्यः पट इति तान्येतान्यभेदसाधना ८
र त्वमिति इतश्च तंतुभ्यो पटो न भिद्यते गुरुत्वकार्यान्तराग्रहणात् इह यस्माद्यद्भिन्नं भवति तस्मात्तस्य गुरुत्वकार्यान्तरं २

ननु पट उत्पद्यते पटो विनश्यतीति स्वात्मन्युत्पत्तिविनाशलक्षणक्रियाविरोधात् तन्तुषु पट इति व्यपदेशः प्रावरणार्थक्रियाभेदश्चैतेषामन्यथानुपपत्त्या तंतुपटयोर्भेदं साधयन्त्यपि तेरन्यथाप्युपपत्तिमाहुस्वात्मनीति ॥२

न्वीतानि तद्वदभेदेसिद्धे तंतुव एव तेन तेन संस्थानभेदेन परिणताः पटः न तंतुभ्योर्थान्तरं पटः स्वात्मनि क्रियाविरोधसंबंध
बुद्धिव्यपदेशार्थक्रियाभेदाश्चनैकान्तिकं भेदं साधयितुमर्हंति एकस्मिन्नेव तत्तद्विशेषाविर्भावतिरोभावाभ्यामेतेषामविरोधात्
यथा कूर्मस्यांगानि कूर्मे शरीरे निविशमानानि तिरोभवंति निःसरंति चाविर्भवंति न च कूर्मतस्तदंगान्युत्पद्यंते प्रध्वंसंते
वा एवमेकस्या मृदः सुवर्णस्य वा घटमुकुटादयो विशेषा निःसरंत आविर्भवन्त उत्पद्यंते इत्युच्यंते निविशमाना स्तिरो
भवन्ति विनश्यन्तीत्युच्यंते न पुनरसतामुत्पादः सतां वा निरोधः यथाह भगवान्कृष्णद्वैपायनः नासतो विद्यते भा
वो नाभावो विद्यते सतः यथा कूर्मः स्वावयवेभ्यः संकोचिविकाशिभ्यो न भिन्नः एवं घटमुकुटादयोपि मृत्सुवर्णादिभ्यो
न भिन्नाः एवं चेह तंतुषु पट इति व्यपदेशः यथेह वने तिलका इत्युपपन्नः न चार्थक्रियाभेदो भेदमापादयति एक
स्यापि नानार्थक्रियाभेददर्शनात् यथैकएव वह्निर्दाहकः प्रकाशकः पाचकश्चेति नाप्यर्थक्रियाव्यवस्थावस्तुभेदहेतुः
तेष्वेव व्यस्तसमस्तानामर्थक्रियाव्यवस्थादर्शनात् यथा प्रत्येकं विष्टयो वर्त्मदर्शनं न तु शिवि
शिविकावाहनम् मिलितास्तु शिविकां वहंति एवं तंतवः प्रत्येकं प्रावरणमकुर्वाणा अपि मिलिता आविर्भूतपटरूपा
अरं२ वाः प्रावरिष्यंति स्यादेतत् आविर्भावः पटस्य कारणव्यापारात्प्रागसन् सन्वा असंश्चेत्प्राप्तं तर्ह्यसदुत्पादनम् अथ
सन्कृतं तर्हि कारणव्यापारेण न हि सति कार्ये कारणव्यापारं पश्यामः आविर्भावे चाविर्भावांतरकल्पनेनवस्थाप्र
संगः तस्मादाविर्भूतपटभावास्तंतवः क्रियंते इति रिक्तं वचः मैवम् अथासदुत्पद्यते इति मते कथमसदुत्पत्तिः
सत्यसती वा सती चेत्कृतं तर्हि कारणैः असती चेत्तस्या अप्युत्पत्त्यंतरमित्यनवस्था अथासतिः पटात्नार्थान्तरम्
प्रावरिष्यंतीति वा पाठः २

तस्य समवायस्यानित्यत्वात् = २

सां॰कौ॰ पितुपट एवासौ तथापि यावद्रुतो न भवतिपट इति तावदुत्पन्नो भवति उत्पद्यते इति ततश्च पटः तन्तुतो उत्पद्यत इति न वाच्यम्
९ योनस्त्वयात् विनश्यतीत्यपि न वा च्यम् उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात् तस्मादियं पटोत्पत्तिः स्वकारणसमवा
१ योवा स्वसत्तासमवायोवा उभयथापि नोत्पद्यते अथ च तदर्थानि कारणानि व्याप्रियंते एवं सत एव पटस्य आविर्भावाय का
रणापेक्षेत्युपपन्नम् न च पटरूपेण कारकाणां संबंधः तद्रूपस्याक्रियात्वात् क्रियासंबंधित्वाच्च कारकानामन्यथा कारकत्वा
भावात् तस्मात्सत्कार्यमितिपुष्कलम् ९ तदेवं प्रधानसाधनानुगुणं सत्कार्यमुपपाद्य यादृशं तत्प्रधानं साधनीयं तादृ
शमादर्शयितुं विवेकज्ञानोपयोगिनी व्यक्ताव्यक्तसारूप्यवैरूप्ये तावदाह हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं
लिंगम् सावयवं परतंत्रं व्यक्तं विपरीतमव्यक्तम् १० हेतुः कारणं तद्वत् यस्य च यो हेतुस्तमुपरिष्टाद्वक्ष्यति अनित्यं वि
नाशि तिरोभावीतियावत् अव्यापि सर्वं परिणामिनं न व्याप्नोति कारणेन हि कार्यमाविष्टं न कार्येण कारणम् न च बुद्ध्या
दयः प्रधानं व्याप्नुवंतीत्यव्यापकाः सक्रियं परिस्पंदवत् तथाहि बुद्ध्यादय उपात्तमुपात्तं देहं त्यजंति देहांतरं चोपाददत इ
ति तेषां परिस्पंदः शरीरपृथिव्यादीनां च परिस्पंदः प्रसिद्ध एव अनेकं प्रतिपुरुषं बुद्ध्यादीनां भेदात् पृथिव्याद्यपि शरीरघटा
दिभेदेनानेकमेव आश्रितं स्वकारणमाश्रितं तंतुद्वारादिकार्यम् अभेदेपि कथं चिद्भेदमाश्रित्याश्रयाश्रयिभावः यथेह
वने तिलकाः इत्युक्तम् लिंगम् प्रधानस्य यथा चैते बुद्ध्यादयः प्रधानस्य लिंगं तथोपरिष्टाद्वक्ष्यति प्रधानं तु न प्रधान
स्य लिंगं पुरुषस्य लिंगं भवेदपीति भावः सावयवमिति अवयवो वयवविसंयोगः प्राप्तिरूपा वा अवयवानां मिथः संश्ले
षो मिश्रणं संयोग इतियावत् अप्राप्तिपूर्विका प्राप्तिः संयोग इत्यनेन सह वर्त्तते इति सावयवम् तथाहि पृथिव्यादयः परस्प ९

रं संयुज्यते एवमन्येपि न तु प्रधानस्य बुद्ध्यादिभिः संयोगस्तादात्म्यात् नापि सत्त्वरजस्तमसां परस्परं संयोगः अप्राप्तेरभावात्
परतंत्रम् बुद्ध्यादि स्वकार्ये अहंकारे जनयितव्ये प्रकृत्यापूरमपेक्षते अन्यथा क्षीणसती नालमहंकारं जनयितुमिति स्थितिः ए
वमहंकारादिभिरपि स्वकार्यजनने इति सर्वं स्वकार्ये प्रकृत्यापूरमपेक्षते तेन प्रकृतिं परामपेक्षमाणं कारणमपि कार्योपज
ननेन परतंत्रं व्यक्तं विपरीतमव्यक्तम् व्यक्तात् अहेतुमन्नित्यं व्यापि निष्क्रियम् यद्यप्यव्यक्तस्यास्ति परिणामलक्षणा क्रिया तथा
पि परिस्पंदो नास्तीति एकमनाश्रितमलिंगमनवयवं स्वतंत्रमव्यक्तम् १० तदनेन प्रबंधेन व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तम्
संप्रति तयोः साधर्म्यं पुरुषाच्च वैधर्म्यमाह त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि व्यक्तं तथा प्रधानं त
द्विपरीतस्तथा च पुमान् ११ त्रयो गुणाः सुखदुःखमोहाः अस्येति त्रिगुणम् तदनेन सुखादीनामात्मगुणत्वं पराभिमत
मपाकृतम् अविवेकि यथा प्रधानं न स्वतो विविच्यते एवं महदादयोपि न प्रधानाद्विविच्यंते तदात्मकत्वात् अथवा सं
भूयकारितां अविवेकिता न हि किंचिदेकं पर्याप्तं कार्ये अपि तु संभूय तत्रैकस्य चित् केनचिदपि संभवतीति येत्वाहुर्विज्ञानमेव हर्ष
विषादशब्दाद्यात्मकं न तु नारितो न्यस्ते सुखादय इति तान्प्रत्याह विषय इति विषयो ग्राह्यो विज्ञानाद्बहिरिति यावत् अत एव सा
मान्यम् साधारणम् अनेकैः पुरुषैर्गृहीत इत्यर्थः विज्ञानाकारत्वे त्वसाधारण्यं विज्ञानानां वृत्तिरूपाणां तेष्वसाधार
णाः स्युः तथा च चारुलतायां कटाक्षे एकस्मिन् बहूनां प्रतिसंधानं न स्यादन्यथा तत्परस्यादिति भावः अचेतनम् सर्व एव
प्रधानबुद्ध्यादयोप्यचेतनाः न तु वैनाशिकवच्चैतन्यं बुद्धेरित्यर्थः प्रसवधर्मि प्रसवरूपो धर्मः सोस्यास्तीति प्रसवधर्मि प्रस
वधर्मीति वक्तव्ये मत्वर्थीयः प्रसवधर्मस्य नित्ययोगमाख्यातुम् सरूपविरूपपरिणामाभ्यां न कदाचिदपि वियुज्यत इत्यर्थः

विज्ञानं यथा परेण न गृह्यते परबुद्धेरप्रत्यक्षत्वादिति भावः २

विज्ञानस्य सुखाद्यात्मकत्वे ३

विज्ञान४

घटादिव तुष्य

बौद्धवत्२

नैकस्मा तद्द

हर्षविषाद शब्दादयः ५

सां० कौ० व्यक्तं व्यक्तमव्यक्ते तिष्ठति तथा प्रधानम् यथा व्यक्तं तथा व्यक्तमपीत्यर्थः ताभ्यां वैधर्म्यं पुरुषस्याह तद्विपरीतस्तथा च पुमान् वक्ष्यमाणकारिकायां ५
१० इत्यादे तत्र अहेतुमत्त्वनित्यत्वादि प्रधानसाधर्म्यमस्ति पुरुषस्य एवमनेकत्वं व्यक्तसाधर्म्यमुक्तं कथमुच्यते तद्विपरीतः पुमा
10 नित्यत आह तथा च पुमानिति चकारोऽर्थः यद्यप्यहेतुमत्त्वादि साधर्म्यं तथाप्यत्रैगुण्यादि वैपरीत्यमस्येत्यर्थः ११ त्रिगुणमि
त्युक्तं तत्र के गुणास्त्रय किं तद्रूपलक्षितमित्यत आह प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभिभवा
श्रयजननमिथुनवृत्तयश्च गुणाः १२ प्रीत्यप्रीतिविषादात्मका गुणा गुणा इति परार्थाः सत्त्वं लघु प्रकाशकमित्यत्र च सत्त्वादयः
क्रमेण निर्दिश्यन्ते तदनागतावेक्षणेन तं त्रयु तथा नाम प्रीत्यादीनां यथासंख्यं वेदितव्यम् एतदुक्तं भवति प्रीतिः सुखं प्रीत्या
त्मकः सत्त्वगुणः अप्रीतिर्दुःखम् अप्रीत्यात्मको रजो गुणः विषादो मोहः विषादात्मकस्तमो गुण इति ये तु मन्यन्ते प्रीति तेन
र्न दुःखाभावादतिरिच्यते एवं दुःखमपि न प्रीत्यभावादन्यदिति तान् प्रत्यात्मग्रहणम् नेतरेतराभावाः सुखादयो
ऽपि तु भावाः आत्मशब्दस्य भाववचनत्वात् प्रीतिरात्माभावो येषां ते प्रीत्यात्मानः एवमन्यदपि व्याख्येयम् भावभूतत्वं चैषा
मनुभवसिद्धं परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याभावेऽप्रसिद्धेरन्यस्याप्यसिद्धिरिति भावः स्वरूपमेषां गुणाना
मुक्त्वा प्रयोजनमाह प्रकाशप्रवृत्तिनियमार्थाः अत्रापि यथासंख्यमेव रजः प्रवर्तकत्वात् सर्वत्र लघुसत्त्वं प्रवर्तयेत् यदि
तमसा गुरुणा न नियम्येत तमो नियतं तु क्वचिदेव प्रवर्तयतीति भवति तमो नियमार्थम् प्रयोजनमुक्त्वा क्रियामाह
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च वृत्तिः क्रिया सा च प्रत्येकमभिसंबध्यते अन्योन्याभिभववृत्तयः एषामन्यतमेन
पृथक्शब्देनोद्भूतेनान्यदभिभूयते सत्त्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते एवं रजः सत्त्वतमसी अभिभूय घोराम् १०

तथाहि १ मि १

एवंतमः सत्वरजसोः अभिभूयमूढमिति अन्योन्याश्रयवृत्तयः यद्यप्याधाराधेयभावेन नायमर्थो घटते तथापि यदपेक्षया याय
स्य क्रिया स तस्याश्रयः तथाहि सत्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसोः प्रकाशेनोपकरोति रजः प्रकाशनियमावाश्रित्य प्रवृ
त्त्येतरयोः तमः प्रकाशप्रवृत्ती आश्रित्य नियमेनेतरयोरिति अन्योन्यजननवृत्तयः अन्यतमोन्यतमं जनयति जननं च परि
णामः स च गुणानां सदृशरूपः अतएव न हेतुमत्वं तत्वांतरस्य हेतोरभावात् नाप्यनित्यत्वं तत्वांतरे लयाभावात् अन्योन्यमिथु
नवृत्तयः अन्योन्यसहचरा अविनाभाववर्त्तिन इति यावत् चः समुच्चये भवति चात्रागमः अन्योन्यमिथुनाः सर्वे सर्वे स
र्वत्रगामिनः रजसो मिथुनं सत्वं सत्वस्य मिथुनं रजः तमसश्चापि मिथुने ते सत्वरजसी उभे उभयोः सत्वरजसोर्मिथुनं तम
उच्यते नैषामादिः संप्रयोगो वियोगो वोपलभ्यते इति १२ प्रकाशप्रवृत्तिनियमार्था इत्युक्तं तत्र के ते इत्यपेक्षिताः कुतस्त्ये
त्यत आह सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः १३ सत्व
मेव लघु प्रकाशकमिष्टं सांख्याचार्यैः तत्र कार्योद्गमने हेतुर्धर्मो लाघवं गौरवप्रतिद्वंद्वि यतोग्नेरूर्द्ध्वज्वलनं भवति तदे
इंद्रियाणां वलाघवं कस्यचित्तिर्यग्गमने हेतुर्भवति यथा वायोः एवं करणानां वृत्तिपटुत्वहेतुर्लाघवं गुरुत्वे मंदानि स्युरिति सत्व
स्य प्रकाशात्मकत्वमुक्तं सत्वतमसी स्वयमक्रिय तया स्वकार्यप्रवृत्तिं प्रत्यवसीदंती रजसोपष्टभ्येते अवसादात् उच्चा असामर्थ्यात्
ल्य स्वकार्ये उत्साहं प्रयत्नं कार्यते इति तदिदमुक्तमुपष्टम्भकं रजः इति कस्मादित्यत उक्तं चलमिति तदनेन रजसः प्रवर्त्त कारिता
कत्वं दर्शितम् रजस्तु चलतया परितस्त्रैगुण्यं चालयेद्गुरुणावृण्वता च तमसा तत्र तत्र प्रवृत्तिप्रतिबंधकेन क्वचिदेव प्रव त्वा
र्त्यत इति ततस्ततो व्यावृत्त्या तमो नियामकमुक्तम् गुरु वरणकमेव तम इति एवकारः प्रत्येकं भिन्नक्रमः संबध्यते सत्वमेव

सां॰ कौ॰ रज एव तम एव ननु परस्परविरोधशीला गुणाः सुंदोपसुंदवत्परस्परं ध्वंसेरन्नित्येव युक्तं प्रागेव तेषामेकक्रियाकर्तृत्वं इत्य
११ त आह प्रदीपवच्चार्थतो वृत्तिः दृष्टमेतद्यथा वर्त्तितैले अनलविरोधिनी अथ च मिलिते सहानलेन रूपप्रकाशनलक्षणैका
॥ र्यं कुरुतः यथा च वातपित्तश्लेष्माणः परस्परविरोधिनः शरीरधारणलक्षणैककार्यकारिणः एवं सत्त्वरजस्तमांसि मिथो विरुद्धा
न्यप्यनुवर्त्स्यंति च स्वकार्यं करिष्यंति च अर्थतः इति पुरुषार्थत इति यावत् यथा च वक्ष्यति पुरुषार्थ एव हेतुर्न केनचित्कार्यते कर
णमिति अत्र सुखदुःखमोहाः परस्परविरोधिनः स्वानुरूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयंति तेषां च परस्परम
भिभाव्याभिभावकभावान्नानात्वम् तद्यथा एकैव स्त्री रूपयौवनकुलशीलसंपन्ना स्वामिनं सुखाकरोति तत्कस्य हेतोः स्वामिनं
अलभमानं प्रति तस्याः सुखरूपसमुद्भवात् सैव स्त्री सपत्नीर्दुःखाकरोति तत्कस्य हेतोः ताः प्रति तस्या दुःखरूपसमुद्भवात् एवं पुरुषांतर
मानं ता मविंदत् सैव मोहयति तत्कस्य हेतोः तं प्रति तस्या मोहरूपसमुद्भवात् अनया स्त्रिया सर्वे भावा व्याख्याताः तत्र यत्सुखहेतुस्त
त्सुखात्मकं सत्त्वं यद्दुःखहेतुस्तद्दुःखात्मकं रजः यन्मोहहेतुस्तन्मोहात्मकं तमः सुखप्रकाशलाघवानां चैकस्मिन्युगपदुद्भू
ताव विरोधः सहदर्शनात् तस्मात्सुखदुःखमोहैरिवाविरोधिभिरविरोधिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा उन्नीयंते
एवं दुःखोपष्टंभकत्वप्रवर्त्तकत्वैः एवं मोहगुरुत्वावरणैरिति सिद्धं त्रैगुण्यमिति १३ स्यादेतत् अनुभूयमानेषु पृथिव्यादिषु
भवतु सिद्धं भवंतु अविवेकित्वादयः ये पुनः सत्त्वादयो नानुभवपथमधिरोहंति तेषां कुतस्त्यम् अविवेकित्वं विषयत्वं सामान्य
त्वमचेतनत्वं प्रसवधर्मित्वं चेत्यत आह अविवेकादिः सिद्धस्त्रैगुण्यात्तद्विपर्ययाभावात् कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि
सिद्धम् १४ अविवेकित्वमविवेकि यथा द्व्येकयोर्द्विवचनैकवचने इत्यत्र द्वित्वैकत्वयोरिति अन्यथा द्व्येकेष्विति स्यात् कुतः पुनर
विवेकित्वादिसिद्धिरित्यत आह त्रैगुण्यात् यद्यत्सुखदुःखमोहात्मकं तत्तदविवेकादियोगि यथेदमनुभूयमानं व्यक्तमिति स्फुट ११
सत्वादयः अविवेकित्वादियोगिनः सुखदुःखमोहात्मकत्वात् ।

इदं व्यक्तमव्यक्तं चाविवेक्यादियोगि त्रैगु
ण्यात् यत्राविवेक्याद्यभावः तत्र त्रैगुण्या
भावो यथा पुरुष इति यत्र त्रैगुण्यं तत्रावि
वेकादीति न
वति यक्तोव्य
क्तमिति दृष्टो
ताभावात् २

सर्वं व्यक्तं दृष्टान्तीकृत्याव्यक्तस्यैव वीक्ष्य त्रैगुण्याद्धेतोरविवेकित्वं साधितमिदानीं शेषवतानुमानेन व्यक्ताव्यक्तयोस्स्वयोस्तेनै
व हेतुना तदेव साधयति अथवेति २

भत्वादन्वयेनोक्त्वा व्यतिरेकमाह तद्विपर्य्ययाभावात् अविवेक्यादिविपर्ययेषु पुरुषेषु त्रैगुण्याभावात् अथवा व्यक्ताव्यक्ते पक्षी
कृत्यान्वयाभावेनावीतं एव हेतुस्त्रैगुण्यादिति वक्तव्यः स्यादेतत् अव्यक्तसिद्धौ सत्यां तस्याविवेकित्वादयो धर्माः सिध्यन्ति अ
व्यक्तमेव त्वद्यापि न सिद्धं तत्कथमविवेकित्वादिसिद्धिरित्यत आह कारणगुणात्मकत्वादिति अयमभिसंधिः कार्यं हि
कारणगुणात्मकं दृष्टं यथा तन्त्वादिगुणात्मकं पटादि तथा महदादिलक्षणेनापि कार्येण सुखदुःखमोहरूपेण स्वकारणजा
तसुखदुःखमोहात्मना भवितव्यं तथा च तत्कारणं सुखदुःखमोहात्मकं प्रधानमव्यक्तं सिद्धं भवति १४ स्यादेतत् व्यक्ताद्व्यक्त
मुत्पद्यते इति कणभक्षाक्षचरणतनयाः परमाणवो हि व्यक्तास्ते द्व्यणुकादिक्रमेण पृथिव्यादिलक्षणं कार्यमारभ्यते पृथिव्या
दिषु च कारणगुणक्रमेण रूपाद्युत्पत्तिस्तस्माद्व्यक्ताद्व्यक्तस्य तद्गुणस्य चोत्पत्तेः कृतमदृष्टचरेणाव्यक्तेनेत्यत आह भेदा
नां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य १५ भेदानां विशेषाणां महदादी
नामस्त्येतानां कारणमस्त्यव्यक्तम् कुतः कारणकार्यविभागात् अविभागाद्वैश्वरूप्यस्य कारणे सत्कार्यमिति हि स्थितम्
तथा च यथा कूर्मशरीरे सन्त्येवाङ्गानि निःसरन्ति विभज्यन्ते इदं कूर्मशरीरमेतान्येतस्याङ्गानि एवं निविशमानानि तस्मिन्नव्य
क्तीभवन्ति एवं कारणान्मृत्पिण्डाद्धेमपिण्डाद्वा कार्याणि घटमुकुटादीनि सन्त्येवाविर्भवन्ति विभज्यन्ते सन्त्येव पृथिव्या
दीनि कारणात्तन्मात्रादाविर्भवन्ति विभज्यन्ते सन्त्येव तन्मात्राण्यहंकारात् सन्नेवाहंकारः कारणान्महतः सन्नेव च मह
त्परमाव्यक्तादिति सोयं कारणात्परमाव्यक्तात्साक्षात्पारम्पर्येण विश्वस्य कार्यस्य विभागः प्रतिसर्गे तु मृत्पिण्डं सुवर्णपि
ण्डं वा कुम्भमुकुटादयो विशन्तोऽव्यक्तीभवन्ति तत्कारणरूपमेवानभिव्यक्तं कार्यमपेक्ष्याव्यक्तं भवति एवं पृथिव्यादयस्तन्मा
त्राणि विशन्तः स्वापेक्षया तन्मात्राण्यव्यक्तयन्ति एवं तन्मात्राण्यहंकारं विशन्त्योऽहंकारमव्यक्तयन्ति एव महंकारो महान्तमा

सां॰ कौ॰ १२ विशन्महांतमव्यक्तयति महान् प्रकृतिंस्वकारणं विशन्प्रकृतिमव्यक्तयति प्रकृतेस्तुनास्ति विनिवेश इति सर्वकार्याणाम ऽ
१२ व्यक्तमेवसायम विभागः प्रकृतौ चैव स्वरूपस्य नानारूपस्य कार्यस्य चाविकः अव्यक्ते तस्मात्कारणात्कार्यस्य सतः विभागा
12 विभागाभ्यामव्यक्तं कारणमस्तीति इतश्चाव्यक्तमस्तीत्याह शक्तितः प्रवृत्तेश्च कारणशक्तितः कार्यं प्रवर्तते इति सिद्धम
शक्तात्कारणात्कार्यस्यानुत्पत्तेः शक्तिश्च कारणगता न कार्यस्याव्यक्तत्वादन्या नहि सत्कार्यपक्षे कार्यस्याव्यक्ततायाः अ
न्यस्यांशक्तौ प्रमाणमस्ति अयमेव हि सिकताभ्यः तिलानां तैलोपादानानां भेदो यदेतेष्वेव तैलमस्त्यनागतावस्थं न सिक
तास्विति स्यादेतत् शक्तितः प्रवृत्तिः कार्यकारणविभागाविभागौ च महत एव परमाव्यक्तत्वं साधयिष्यतः कृतं परेणाव्यक्ते
नेत्यत आह परिमाणात् परिमितत्वादव्यापित्वादिति यावत् विवादाध्यासिता महदादिभेदा अव्यक्तकारणवंतः परिमि
तत्वात् घटादिवत् घटादयो हि परिमिता मृदाद्यव्यक्तकारणका दृष्टाः उक्तमेतत् यथा कार्यस्याव्यक्तावस्था कारणमे
वेति यन्महतः कारणं तत्परमाव्यक्तम् ततः परतराव्यक्तकल्पनायां प्रमाणाभावात् इतश्च विवादाध्यासिताभेदा अव्य
क्तकारणवंतः समन्वयात् भिन्नानां समानरूपता समन्वयः सुखदुःखमोहसमन्विता हि बुद्ध्यादयोऽध्यवसायादिलक्ष
णाः प्रतीयंते यानि च यद्रूपसमनुगतानि तानि च तत्स्वभावाव्यक्तकारणकानि यथा मृद्धेमपिंडसमनुगताः घटमुकुटादयो
मृद्धेमपिंडाव्यक्तकारणका इति कारणमस्त्यव्यक्तं भेदानामिति सिद्धम् १५ अव्यक्तं साधयित्वास्य प्रवृत्तिप्रकारमाह कारणम
कारणदिपद स्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदायाच्च परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात् १६ प्रतिसर्गावस्थायां सत्वं र प्रलयेऽर
सप्तदशेनान जस्तमश्च सदृशपरिणामानि भवंति परिणामस्वभावका हि गुणा नापरिणम्य क्षणमप्यवतिष्ठंते तस्मात्सत्वं सत्वरूपतया रजो
यः= ४ रजोरूपतया तमस्तमोरूपतया प्रतिसर्गावस्थायामपि प्रवर्त्तते तदिदमुक्तं त्रिगुणत इति प्रवृत्त्यंतरमाह समुदायाच्च सम १२
त

सोदयः समुदयः समवायः समुदयस्य गुणानां न गुणप्रधानभावमंतरेण संभवति न च गुणप्रधानभावो वैषम्यं विना न च वैषम्य
मुपमर्द्योपमर्दकभावादृते इति महदादिभावेन प्रवृत्तिर्द्वितीया स्यादेतत् कथमेकरूपाणां गुणानामनेकरूपा प्रवृत्तिरित्यत।
आह परिणामतः सलिलवत् यथाहि वारिदविमुक्तमुदकमेकरसमपि तत्तद्भूविकारानासाद्य नारिकेलतालतालीविल्वचिर
विल्वतिंदुकामलकप्राचीनामलककपित्थफलरसतया परिणमन्मधुराम्लतिक्तकषायकटुतया विकल्प्यते एवमेकैकगु
णसमुद्भवादभिभवात्प्रधानगुणमाश्रित्याप्रधानगुणाः परिणामभेदान्प्रवर्त्तयंति तदिदमुक्तं प्रतिप्रतिगुणाश्रयविशे
षात् एकैकगुणाश्रयेणयो विशेषस्तस्मादित्यर्थः १६ यत्तु तौष्टिका अव्यक्तं महांतं वाहंकारं वाइंद्रियाणि वाभूतानि वात्मानमभि बुद्धिं ६=
मन्यमानास्तान्येवोपासते तान्प्रत्याह संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात् पुरुषोस्ति भोक्तृभावात्कैवल्यार्थं तथा
प्रवृत्तेश्च. १७ अव्यक्तादेर्व्यतिरिक्तः पुरुषोस्ति कुतः संघातपरार्थत्वात् अव्यक्तमहदहंकारादयः परार्थाः संघातत्वात् शय
नासनाभ्यंगादिवत्सुखदुःखमोहात्मकतया व्यक्तादयः सर्वे संघाताः स्यादेतत् शयनासनादयः संघाताः संहतशरीराद्यर्था।
दृष्टाः न त्वात्मानं प्रति परार्थाः तस्मात्संघाताः संघातांतरमेव परं गमयेयुर्न त्वसंहतमात्मानमित्यत आह त्रिगुणादिविपर्ययात्
अयमभिप्रायः संघातांतरार्थत्वे हि तस्यापि संघातत्वात्तेनापि संघातांतरार्थेन भवितव्यमेवं तेन तेनेत्यनवस्थाप्रसंगात् न च व्य
वस्थायां सत्यामव्यवस्थायुक्ता कल्पनागौरवप्रसंगात् न च प्रमाणवत्त्वेन गौरवमपि मृष्यते इति वाच्यं संघातत्वस्य परार्थमा
त्रेणान्वयात् दृष्टांतदृष्टसर्वधर्मानुरोधेन त्वनुमानमिच्छतः सर्वानुमानोच्छेदप्रसंग इत्युपपादितं न्यायवार्त्तिकतात्पर्यटी
कायामस्माभिः तस्मादनवस्थाभियासंघातत्वमिच्छता त्रिगुणत्वविवेकित्वमविषयत्वमसामान्यत्वं चेतनत्वमप्रसवध
र्मित्वं चाभ्युपेयं त्रिगुणत्वादयो हि धर्माः संहतत्वेन व्याप्ताः तत्संहतत्वमस्मिन्परे व्यावर्त्तमानं त्रैगुण्यादि व्यावर्त्तयति अंसन

बुद्ध्यादयो दृश्याः सुखाद्यात्मकत्वात् पृथिव्यादिवत्॰

सां॰कौ॰ १३ त्वमिव व्यावर्त्तमानं कठ... त्वादिव्यावर्त्तयति तस्मादाचार्येण त्रिगुणादिविपर्ययादिति वदता संहतः परो विवक्षितः स चात्मेति
सिद्धं इतश्च पुरुषोऽस्ति अधिष्ठानात् त्रिगुणानामधिष्ठीयमानत्वात् यद्यत्सुखदुःखमोहात्मकं तत्सर्वं परेणाधिष्ठीयमानं
दृष्टं यथा रथादि यंत्रादिभिः सुखदुःखमोहात्मकं चेदं बुद्ध्यादि तस्मादेतदपि परेणाधिष्ठातव्यं स च परस्त्रैगुण्यादन्य आ।
13 त्मेति इतश्च पुरुषोऽस्ति भोक्तृभावात् भोक्तृभावेन भोग्ये सुखदुःखे उपलक्षयति भोग्ये हि सुखदुःखे अनुकूलप्रतिकूलवे
प्रतिकूलनीये नप दनीये प्रत्यात्ममनुभूयेते तेनानयोरनुकूलनीयेन च केनचिदप्यन्येन भवितव्यं न चानुकूलनीयाः प्रतिकूलनीया
वा बुद्ध्यादयस्तेषां सुखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधात् तस्माद्योऽसुखाद्यात्मा सोऽनुकूलनीयः प्रतिकूलनीयो वा
स चात्मेति अन्ये त्वाहुः भोग्या दृश्या बुद्ध्यादयः न च द्रष्टारमंतरेण दृश्यता युक्ता तेषां तस्मादस्ति द्रष्टा दृश्यबुद्ध्याद्य
तिरिक्तः स चात्मेति भोक्तृभावात् द्रष्टृभावात् दृश्येन द्रष्टुरनुमानादित्यर्थः दृश्यत्वं च बुद्ध्यादीनां सुखाद्यात्मकतया पृथिव्यादिवदनु
मितं इतश्चास्ति पुरुष इत्याह कैवल्यार्थं प्रवृत्तेः शास्त्राणां महर्षीणां दिव्यलोचनानां च कैवल्यं चात्यंतिकदुःखत्रयप्रशमलक्षणं
न बुद्ध्यादीनां संभवति ते हि दुःखाद्यात्मकाः कथं स्वभावाद्वियोजयितुं शक्यंते तदतिरिक्तस्य दुःखादिरहितस्य त्वात्मनस्ततो वियोगः शक्य
कू४५ संपादः तस्मात्कैवल्यार्थं प्रवृत्तेरागमानां महर्षीणां चास्ति बुद्ध्याद्यतिरिक्त आत्मेति सिद्धं १७ तदेवं पुरुषास्तित्वं प्रतिपाद्य स किं सर्वशरी
रेष्वेकः किमनेकः प्रतिशरीरमिति संशये तस्य प्रतिक्षेत्रमनेकत्वमुपपादयति जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च पुरुषबहुत्वं
सिद्धं त्रैगुण्यविपर्ययाच्चैव १८ पुरुषबहुत्वं सिद्धं कस्मात् जननमरणकरणानां प्रतिनियमात् निकायविशिष्टाभिरपूर्वाभिर्देहेंद्रियाहंका। सम्बह३
रमनोबुद्धिवेदनाभिः पुरुषस्याभिसंबंधो जन्म न तु पुरुषस्य परिणामस्तस्यापरिणामित्वात् तेषामेव च देहादीनामुपात्तानां परित्यागो मर
णं न त्वात्मनो विनाशस्तस्य कूटस्थनित्यत्वात् करणानि बुद्ध्यादीनि त्रयोदश तेषां जननमरणकरणानां प्रतिनियमो व्यवस्था सा खलु १३

जातिविशिष्टाभिरिति द्वि पाठः ३

छेदिते ३

त्वियं सर्वशरीरेष्वेकस्मिन् पुरुषेनोपपद्यते तदा खल्वेकस्मिन् जायमाने सर्वे जायेरन् म्रियमाणे च म्रियेरन् अंधादौ चैकस्मिन् सर्व
एवांधाद यो विचित्ते चैकस्मिन् सर्व एव विचित्ताः स्युरित्यव्यवस्था प्रतिक्षेत्रं पुरुषभेदे भवति व्यवस्था न चैकस्यापि पुरुषस्य देहोपा
धिभेदाद्व्यवस्थेति युक्तं पाणिस्तनाद्युपाधिभेदेनापि जन्ममरणादिव्यवस्थाप्रसंगात् नहि पाणौ [illegible] जातेवास्तनादौ मृ
ते वयवेषु वर्तिजीतामृता वा भवतीति इतश्च प्रतिक्षेत्रं पुरुषभेद इत्याह अयुगपत्प्रवृत्तेश्च [illegible] प्रवृत्तिः प्रयत्नलक्षणा यद्य
प्यंतःकरणवर्तिनी तथापि पुरुषे उपचर्यते तथा च तस्मिन्नेकत्र शरीरे प्रयतमाने सति सर्वशरीरेष्वेक एवेति सर्वः प्रयतेत ततश्च [illegible]
सर्वाण्येव शरीराणि युगपच्चालयेत् नानात्वे तु नायं दोष इति इतश्च पुरुषभेद इत्याह त्रैगुण्यविपर्ययाच्चैव एवकारो भिन्नक्रमः सिद्ध नि
त्यस्यानंतरं द्रष्टव्यः सिद्धमेव नासिद्धं त्रयो गुणाः त्रैगुण्यं तस्य विपर्ययोन्यथात्वं केचित्खलु सत्वनिकायाः सत्वबहुलाः यथोर्द्ध्वस्रोतसः केचिद्र
जोबहुलाः यथा मनुष्याः केचित्तमोबहुलाः यथा तिर्यग्योनयः सोयमीदृशस्त्रैगुण्यविपर्ययो न्यथाभावस्तेषु सत्वनिकायेषु न भवेत् यद्य तेषु ८
कः पुरुषः स्यात् [illegible] पुरुषभेदे त्वयमदोषः १८ एवं पुरुषबहुत्वं प्रसाध्य विवेकज्ञानोपयोगितया तस्य धर्मानाह तस्माच्च विपर्यासात् सि
द्धं साक्षित्वमस्य पुरुषस्य कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च १९ तस्माच्चेति चः समुच्चये पुरुषबहुत्वेन सह धर्मांतराणि समुच्चि
नोति विपर्यासादस्मादित्युक्ते त्रैगुण्यविपर्ययादित्यनंतरोक्तं संबध्येत अतस्तन्निरासाय तस्मादित्युक्तं अनंतरोक्तं हि संनिधानादिदमो वि
षयो विप्रकृष्टं च तद इति विप्रकृष्टं त्रिगुणमविवेकीत्यादि संबध्यते तस्मात्त्रिगुणत्वादेर्यो विपर्यासः पुरुषस्यात्रिगुणत्वं विवेकित्व
मविषयत्वमसाधारणत्वं चेतनत्वमप्रसवधर्मित्वं चेति तत्र चेतनत्वेनाविषयत्वेन च साक्षित्वद्रष्टृत्वे प्रदर्शिते चेतनो हि द्रष्टा भवति नाचे
तनः साक्षी च दर्शितविषयो भवति यस्मै दर्श्यते विषयः स साक्षी यथाहि लोके र्थिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयतः एवं प्रकृतिर
पि स्वचरितं विषयं पुरुषाय दर्शयतीति पुरुषः साक्षी न चाचेतनो विषयो वा शक्यो दर्शयितुमिति चैतन्यादविषयत्वाच्च भवति साक्षी अ
त एव द्रष्टापि भवति अत्रैगुण्याच्चास्य कैवल्यं आत्यंतिको दुःखत्रयाभावः कैवल्यं तच्च तस्य स्वाभाविकादेवात्रैगुण्यात् सुखदुःखमोह

नघटते:२ प्रकृतेः३

सां॰कौ॰ १५ रहितत्वात्सिद्धं अतएवात्रैगुण्यान्माध्यस्थ्यं सुखी हि सुखेन तृप्यन् दुःखी च दुःखं द्विषन्न मध्यस्थः स्यात्तदुभयरहितस्तु मध्यस्थ इति चोदासी।
नइति चाख्यायते विवेकित्वादप्रसवधर्मित्वाच्चाकर्तेति सिद्धं १८ स्यादेतत् प्रमाणेन कर्तव्यं समर्थमवगम्य चेतनोऽहं चिकीर्षन्करो
रोमीति कृतिचैतन्ययोः सामानाधिकरण्यमनुभवसिद्धं तदेतस्मिन्मते नावकल्पते चेतनस्याकर्तृत्वात् कर्तुश्चाचैतन्यादित्यत आ
ह तस्मात्तत्संयोगादचेतनं चेतनावदिव लिंगं गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः १९ यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे
युक्तितः सिद्धे तस्माद्भ्रान्तिरियमित्यर्थः लिंगं महदादि सूक्ष्मपर्यन्तं वक्ष्यति भ्रान्तिबीजं संयोगस्तत्सन्निधानं अतिरोहितार्थमन्यत् १९
तत्संयोगादित्युक्तं न च भिन्नयोः संयोगोऽपेक्षां विना न चेयमुपकार्योपकारकभावं विनेत्यपेक्षाहेतुमुपकारमाह पुरुषस्य दर्शनार्थं
कैवल्यार्थं तथा प्रधानस्य पंग्वंधवदुभयोरपि संयोगस्तत्कृतः सर्गः २० प्रधानस्येति कर्मणि षष्ठी प्रधानस्य सर्वकारणस्य यद्दर्श
नं पुरुषेण तदर्थं तदनेन भोग्यता प्रधानस्य दर्शिता ततश्च भोग्यं प्रधानं भोक्तारमन्तरेण न संभवतीति युक्ता भोक्त्रपेक्षा पुरुषस्या
पेक्षां दर्शयति पुरुषस्य कैवल्यार्थं तथाभोग्येन प्रधानेन संभिन्नः पुरुषस्तद्गतं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यार्थं प्रार्थ
कैवल्यं६ प्रधान=६ यते तच्च सत्त्वपुरुषान्यताख्यातिनिबन्धनं न च सत्त्वपुरुषान्यताख्यातिः प्रधानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते अना
दित्वाच्च संयोगपरम्पराया भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यत इति युक्तं ननु भवतु नयोः संयोगो महदादिसर्गस्तु कुत
स्त्य इत्यत आह तत्कृतः सर्गः संयोगो हि न महदादिसर्गमन्तरेण भोगाय कैवल्याय वा पर्याप्त इति संयोग एव भोगापवर्गार्थं
महदादिसर्गं करोतीत्यर्थः २० सर्गक्रममाह प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः तस्मादपि षोडशकात्पंच।
भ्यः पंचभूतानि २१ प्रकृतिरव्यक्तं महदहंकारौ वक्ष्यमाणलक्षणौ एकादशेन्द्रियाणि वक्ष्यमाणानि तन्मात्राणि च सोऽयं षोड
शसंख्यापरिमितो गणः षोडशकः तस्मादपि षोडशकादपकृष्टेभ्यः पंचभ्यस्तन्मात्रेभ्यः पंचभूतान्याकाशादीनि तत्र शब्दतन्मा १४

आदाकाशः शब्दगुणः शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणः शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रात्तेजः शब्द
स्पर्शरूपगुणं शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणाः शब्दस्पर्शरूपरसतन्मात्रसहिताद्गंधतन्मा
त्रात् शब्दस्पर्शरूपरसगंधगुणा पृथिवी जायत इति २१ अथ यत्के सामान्यतो लक्षितं तद्विपरीतमित्यनेन विशेषवत् अस तल्लघुप्रका
शकमित्यादिना व्यक्तमपि सामान्यतो लक्षितं हेतुमदित्यादिना संप्रति विवेकज्ञानोपयोगितया व्यक्तविशेषं बुद्धिं लक्षय व्यक्तानांम विशेषं ६
ति अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यं सात्विकमेतद्रूपं तामसमस्माद्विपर्यस्तं २२ अध्यवसायो बुद्धिरिति
क्रियाक्रियावतोरभेदविवक्षया सर्वो व्यवहर्ता लोच्यमत्वाहमत्राधिकृत इति अभिमत्य कर्तव्यमेतन्मयेत्यध्य
लोक० वस्यति तत प्रवर्तत इति प्रसिद्धं तत्रेयोपादेयकर्तव्यमिति विनिश्चयः चितिसन्निधानादापन्नचैतन्याया बुद्धेः सोध्य
अध्यवसायः८ वसायो बुद्धेरसाधारणो व्यापारस्तदभेदाद्बुद्धिः स च बुद्धेर्लक्षणं समानासमानजातीयव्यवच्छेदकत्वात् तदेवं बुद्धिं ल
क्षयित्वा विवेकज्ञानोपयोगिनस्तस्या धर्मान् सात्विकतामसानाह धर्मो ज्ञानं विराग ऐश्वर्यं सात्विकमेतद्रूपं तामसमस्मा
स्मृत्यादिः =१ द्विपर्यस्तमिति तत्र धर्मोऽभ्युदयनिःश्रेयसहेतुस्तत्र यज्ञादिजन्यः अनुष्ठानजनितो धर्मोऽभ्युदयहेतुरष्टांगयोगजनितो निःश्रे
गुणादि यसहेतुः सत्त्वपुरुषान्यताख्यातिर्ज्ञानं विरागो वैराग्यं रागाभावः तस्य यतमानसंज्ञा व्यतिरेकसंज्ञा एकेन्द्रियसंज्ञा वशीकार दाना१
संज्ञा चेति चतस्रः संज्ञाः रागादयः कषायाश्चित्तवर्तिनस्तैरिन्द्रियाणि यथास्वं विषयेषु प्रवर्तन्ते तेतानि मा प्रवर्त्तिषत विषयेभ्य स्व५
नि...वारणाय४ इन्द्रियाणीति तत्परिपाचनायारंभः प्रयत्नो यतमानसंज्ञा परिपाचने चानुष्ठीयमाने केचित्कषायाः पक्वाः पच्यन्ते केचित् रुधाः४
तत्रैवं पूर्वापरीभावे सति पच्यमानेभ्यः कषायेभ्यः पक्वानां व्यतिरेकावधारणं व्यतिरेकसंज्ञा इन्द्रियप्रवर्त्तनासमर्थतया पक्वा
नामौत्सुक्यमात्रेण मनसि व्यवस्थानमेकेन्द्रियसंज्ञा औत्सुक्यमात्रस्यापि निवृत्तिरुपस्थितेष्वपि दृष्टानुश्राविकविषयेषूपे पारलौकिक=२
क्षाबुद्धिः संज्ञात्रयात्पराचीना सा वशीकारसंज्ञा यामत्र भगवान्पतंजलिर्वर्णयांचकार दृष्टानुश्राविकविषयवितृष्णस्य वशीकार
उपयुक्ता १

गरिमा यतो गुरुर्भवति २ — योगिनां निश्चया नंतरं निश्चेतव्याः पदार्थाः ५
येनस्त्रसत्त्रलोकेऽपि न समवैति ३

सां॰ कौ॰ संज्ञा वैराग्यमिति सोयं बुद्धेर्धर्मो विरागः इति ऐश्वर्यमपि बुद्धिधर्मो यतोऽणिमादिः प्रादुर्भवति तत्राणिमा भवत्यणुः यतः शिलामपि वि-
१५ शति लघिमा लघुर्भवति यतः सूर्यमरीचीनालंब्य सूर्यलोकं याति महिमा यतो महान् भवति प्राप्तिर्यतः अंगुल्यग्रेण स्पृशति
चंद्रमसं प्राकाम्यमिच्छानभिघातो यतो भूमावुन्मज्जति निमज्जति यथोदके वशित्वं भूतभौतिकानि वशीभवंत्यवश्य २ यतः ३
ईशित्वं भूतभौतिकानां प्रभवस्थितिव्ययानामीष्टे यत्रकामावसायित्वं सत्यसंकल्पता यथास्य संकल्पो भवति भूतेषु तथा भूता-
नि भवंति अन्येषां निश्चया निश्चेतव्यमनुविधीयंते योगिनस्तु निश्चेतव्याः पदार्था निश्चयमिति चत्वारः सात्त्विका धर्माः ताम- बुद्धि ४
सास्तु तद्विपरीता बुद्धिधर्माः अधर्माज्ञानावैराग्यानैश्वर्याभिधानाश्चत्वार २ इत्यर्थः २२ अहंकारस्य लक्षणमाह अभि-
मानोऽहंकारस्तस्माद्द्विविधः प्रवर्तते सर्गः एकादशकश्च गणस्तन्मात्रकः पंचकश्चैव २३ अभिमानोऽहंकार इति यत्खल्वा-
लोचितं मतं च तत्राहमधिकृतः शक्तः खल्वहमत्र मदर्था एवामी विषया मत्तो नान्योत्राधिकृतः कश्चिदस्त्यतो अहमस्मीति
योऽभिमानः सोऽहंकारः असाधारणव्यापारत्वादहंकारस्तमुपजीव्य हि बुद्धिरध्यवसति कर्तव्यमेतन्मयेति तस्य कार्यभेदमाह तस्मा-
द्द्विविधः प्रवर्तते सर्गः प्रकारद्वयमाह एकादशकश्च गण इंद्रियाह्वयः तन्मात्रकः पंचकश्चैव द्विविध एव सर्गोऽहंकारान्न त्व- गतैः ६
न्य इति एवकारेणावधारयति २३ स्यादेतत् अहंकारादेकरूपात्कथं जडप्रकाशकौ विलक्षणौ सर्गौ भवत इत्यत आह सात्त्विक
सात्त्विकात् ५ एकादशकः प्रवर्तते वैकृतादहंकारात् भूतादेस्तन्मात्रः स तामसस्तैजसादुभयं २४ प्रकाशकत्वलाघवाभ्यामेकादश-
क इंद्रियगणः सात्त्विको वैकृतात् सात्त्विकादहंकारात्प्रवर्तते भूतादेस्त्वहंकारात्तामसात्तन्मात्रगणः प्रवर्तते कस्मा-
त् यतः स तामसः एतदुक्तं भवति यद्यप्येकोऽहंकारस्तथापि गुणभेदोद्भवाभिभवाभ्यां भिन्नं कार्यं करोतीति ननु यदि सत्त्वत-
मोभ्यामेव सर्वं कार्यं जन्यते तदा कृतमकिंचित्करेण रजसेत्यत आह तैजसादुभयं तैजसाद्राजसादुभयं गणद्वयं भवति य-
द्यपि रजसा न कार्यांतरमस्ति तथापि सत्त्वतमसी स्वयमक्रिये समर्थे अपि न स्वकार्यं कुरुतः रजस्तु चलं तया ते यदा १५

गुणेन २ अ॰ १ सत्त्वतमसी।

चालयति तदात्मकार्यं कर्तृत इति तदुभयस्मिन्नपि कार्ये सत्वतमसोः क्रियोत्पादनद्वारेणास्ति रजसः कारणत्वमिति निर्वर्यं रज इति २५ सात्वि
कमेकादशकमाख्यातुं वाह्येंद्रियदशकं तावदाह बुद्धींद्रियाणि चक्षुःश्रोत्रघ्राणरसनात्वगाख्यानि वाक्पाणिपादपायूपस्था
न्कर्मेंद्रियाण्याहुः २६ सात्विकाहंकारोपादानत्वमिंद्रियत्वं तच्च द्विविधं बुद्धींद्रियं कर्मेंद्रियं चोभयमप्येतदिंद्रस्यात्मनो लिंगत्वादिं
द्रियमित्युच्यते तानि च स्वसंज्ञाभिस्तु रादिभिरुक्तानि तत्र रूपग्रहणलिंगं चक्षुः शब्दग्रहणलिंगं श्रोत्रं गंधग्रहणलिंगं घ्राणं र
सग्रहणलिंगं रसनं स्पर्शग्रहणलिंगं त्वक् वागादीनां कार्यं वक्ष्यति २६ एकादशमिंद्रियमाह उभयात्मकमत्र मनः संकल्पकमिंद्रियं
च साधर्म्यात् गुणपरिणामविशेषान्नानात्वं वाह्यभेदाश्च २७ एकादशस्विंद्रियेषु मध्ये मन उभयात्मकं बुद्धींद्रियं कर्मेंद्रियं च चक्षुरा
दीनां वागादीनां च मनोधिष्ठितानामेव स्वविषयेषु प्रवृत्तेः तदसाधारणेन रूपेण लक्षयति संकल्पकमत्र मनः आलोचितमिंद्रियेण व
स्त्विदमिति संमुग्धमिदमेवं नैवमिति सम्यक् कल्पयति विशेषणविशेष्यभावेन विवेचयतीति यावत् यदाहुः संमुग्धं वस्तुमात्रं च प्रा
क् गृह्णत्यविकल्पितं तत्सामान्यविशेषाभ्यां कल्पयंति मनीषिणः तथा हि अस्ति ह्यालोचितं ज्ञानं प्रथमं निर्विकल्पकं बालमूकादि
विज्ञानसदृशं शुद्धवस्तुजमिति ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया बुद्ध्याध्यवसीयते सापि प्रत्यक्षत्वेन संमता सोयं संकल्पलक्ष
णो व्यापारो मनसः समानासमानजातीयाभ्यां व्यवच्छिन्नं मनो लक्षयति स्यादेतदसाधारणव्यापारयोगिनो यथा महदहंकारौ नें
द्रियमेवं मनोप्यसाधारणव्यापारयोगि नेंद्रियं भवितुमर्हतीत्यत आह इंद्रियं च कुतः साधर्म्यात् इंद्रियांतरैः सात्विकाहंकारोपा
दानत्वं च साधर्म्यं न त्विंद्रलिंगत्वं संघातमहदादीनामप्यात्मलिंगत्वेनेंद्रियत्वप्रसंगात् तस्माद्व्युत्पत्तिनिमित्तमात्रमिंद्रलिंगत्वं न
तु प्रवृत्तिनिमित्तं अथ कथं सात्विकादहंकारादेकस्मादेकादशेंद्रियाणीत्यत आह गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च श
ब्दाद्युपभोगसंप्रवर्तकादृष्टसहकारिभेदात्कार्यभेदः अदृष्टभेदोपि गुणपरिणाम एव बाह्यभेदाश्चेति दृष्टांतार्थं यथा बाह्यभेदा
स्तथैवैतदपीत्यर्थः २७ तदेवमेकादशेंद्रियाणि स्वरूपत उक्त्वा दशानामसाधारणीं वृत्तिमाह शब्दादिषु पंचानाम

वचनादानविहरणोत्सर्गानंदाश्च १

सां० कौ० १६ लोचनमात्रमिष्यते वृत्तिः वचनादानविहरणोत्सर्गानंदाश्च पंचानां २७ बुद्धींद्रियाणां संमुग्धवस्तुदर्शनं वालोचनमुक्तं कर्मे
न्द्रियाणां कंठताल्वादिस्थानमिंद्रियं वाक् तस्या वृत्तिर्वचनं स्पष्टमन्यत् २७ अंतःकरणत्रयस्य वृत्तिमाह स्वालक्षण्यं वृत्तिस्त्रय
16 स्य सैषा भवत्यसामान्या सामान्यकरणवृत्तिः प्राणाद्या वायवः पंच २८ स्वालक्षण्यं स्वमसाधारणं लक्षणं ये तानि स्वलक्ष
णानि महदहंकारमनांसि तेषां भावः स्वालक्षण्यं तच्च स्वालक्षण्यमेव तद्यथा महतोऽध्यवसायोऽहंकारस्याभिमानः संकल्पो म
नसो वृत्तिर्व्यापारः वृत्तिद्वैविध्यं साधारणत्वासाधारणत्वाभ्यामाह सैषा भवत्यसामान्या असाधारणी सामान्यकरणवृत्तिः
प्राणाद्या वायवः पंच सामान्या या सो करणवृत्तिरिति त्रयाणामपि करणानां पंच वायवो जीवनं वृत्तिः तद्भावे भावात् तदभा
वे चाभावात् तत्र प्राणो नासाग्रहृन्नाभिपादांगुष्ठवृत्तिः अपानः कृकाटिकापृष्ठपायूपस्थपार्ष्णिवृत्तिः समानो हृन्नाभिसर्वसं
धिवृत्तिः उदानः कंठतालुमूर्द्धभ्रूमध्यवृत्तिः व्यानस्त्वग्वृत्तिरिति पंच वायवः २८ असाधारणीषु वृत्तिषु क्रमाक्रमौ सप्रका
रावाह युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः २९ दृष्टे यथा यदा सतमसां
धकारे विद्युत्संपातमात्राद्व्याघ्रमभिमुखमतिसंनिहितं पश्यति तदा खल्वस्यालोचनसंकल्पाभिमानाध्यवसाया युगपदेव
प्रादुर्भवंति यतस्ततः उत्सृज्य स्थानादेकपदे अपसरति क्रमशश्च यथा मंदालोके प्रथमं तावद्वस्तुमात्रं संमुग्धमालोचयति अथ
व्याघ्रघतः ५ प्रणिहितमनाः कर्णांताकृष्टसशरसिंजिनीमंडलीकृतकोदंडः प्रचंडतरः पाटच्चरोऽयमिति निश्चिनोति अथ च मां प्रत्येतीत्य
भिमन्यते अथाध्यवस्यति अपसरामीतः स्थानादिति परोक्षे तु त्रयस्य वाह्येंद्रियवर्जं वृत्तिरित्याह अदृष्टे त्रयस्य तत्पूर्विका
वृत्तिः अंतःकरणत्रयस्य युगपत्क्रमेण च वृत्तिर्दृष्टपूर्विकेति अनुमानागमस्मृतयो हि परोक्षेऽर्थे दर्शनपूर्वाः प्रवर्तंते नाते तेना
न्यथा यथा दृष्टे तथादृष्टेऽपीति योजना २९ स्यादेतत् वृत्तयो त्रयाणां चापि तावत्तन्मात्राधीना तेषां सदातनत्वेन स
दोत्पादप्रसंगात् आकस्मिकत्वे तु वृत्तिसंकरप्रसंगो नियमहेतोरभावादित्यत आह स्वां स्वां प्रतिपद्यंते परस्पराकूतहेतुकां १६

अप्रहृत्कारबुद्धिमनोधीनाः २

प्रेर्यते १ अभिप्रायं २

वृत्तिं पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणम् ३० करणानीति शेषः यथाहि बहवः पुरुषाः शाक्तीकयाष्टीकधानुष्ककार्पणिकाः कृतसंकेताः
यष्टुनाशायाष्टि परावस्कन्दनाय प्रवृत्तास्तत्रान्यतमस्याकूतमवगम्यान्यतमः प्रवर्त्तते प्रवरसैन्यस्य शक्तीकः शक्तिमेवादत्ते न यष्ट्यादिकमेवं याष्टीकोपि य
त २ ष्टिमेव न शक्त्यादिकं तथान्योन्यस्य करणस्याकूतात्स्वस्वकार्यकरणाभिमुखादन्यतमं करणं प्रवर्त्तते तत्प्रवृत्तेश्च हेतुत्वात्प्रव
र्त्तिसंकरः इत्युक्तं स्वां स्वां प्रतिपद्यन्ते इति स्यादेतद्याष्टीकादयश्चेतनत्वात्परस्पराकूतमवगम्य प्रवर्त्तन्ते इति युक्तं करणानि त्वचेतना
नि तस्मान्नैवं प्रवर्त्तितुमर्हन्ति तेनैषामधिष्ठात्रा करणानां स्वरूपसामर्थ्योपयोगाभिज्ञेन भवितव्यमत आह पुरुषार्थ एव हेतुर्न केनचित्का
र्यते करणम् भोगापवर्गलक्षणः पुरुषार्थ एवानागतावस्थः प्रवर्त्तयति करणानि कृतमत्र तत्स्वरूपाद्यभिज्ञेन कर्त्रा एतच्च वत्सविवृद्धि
निमित्तमित्यत्रोपपादयिष्यते ३० केनचित्कार्यते करणमित्युक्तं तत्र करणं विभजते करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्
कार्यं च तस्य दशधाहार्यं धार्यं प्रकाश्यं च ३१ करणं त्रयोदशविधं इन्द्रियाण्येकादश बुद्धिरहंकारश्चेति त्रयोदशप्रकारं करणं कारक
विशेषः करणं न च व्यापारावेशं विना कारकत्वमिति व्यापारमाह तदिति यथायथं तत्र कर्मेन्द्रियाणि वागादीन्याहरन्ति यथास्वमुपा
ददते स्वव्यापारेण व्याप्नुवन्तीति यावत् बुद्ध्यहंकारमनांसि तु स्ववृत्त्या प्राणादिलक्षणया धारयन्ति बुद्धीन्द्रियाणि प्रकाशयन्ति आहरण
धारणादिक्रियाणां सकर्मकतया किं कर्म कतिविधं चेत्यत आह कार्यं च तस्य त्रयोदशविधस्य दशधाहार्यं धार्यं प्रकाश्यं च आहार्यं व्या कार्यं आ ६
प्रयथास्वंमा व्याः ३ प्यं कर्मेन्द्रियाणां वचनादानविहरणोत्सर्गानन्दाः ते यथायथं दिव्यादिव्यतया दशेत्याहार्यं दशधा एवं धार्यमपि अन्तःकरणत्रयस्य प्राण
दिलक्षणया वृत्त्या शरीरं तच्च पार्थिवादि पाञ्चभौतिकं [illegible] पञ्चानां समूहः [illegible] ते च पञ्च दिव्यादिव्यतया दशेति धार्यमपि द
शधा एवं बुद्धीन्द्रियाणां शब्दस्पर्शरूपरसगन्धाः यथायथं व्याप्याः ते च यथायथं दिव्यादिव्यतया दशेति प्रकाश्यमपि दशधेति ३१ त्रयो

पंचानां ६ [illegible] शब्दादयः २ पृथिव्यादयः २

पृथिव्यादीनां २

बाह्यकरणं २ स्य॰ १ दशसु २ बाह्यं १ प्रकाशयति १ ३२

विभागं करोति अंतःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यं सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणं अंतःकरणं त्रिविधं बुद्धि
रह कालमनः इति शरीराभ्यंतरं १
सां॰कौ॰ १० दशविधकरणं बाह्यांतरवृत्तित्वात् अंतःकरणं दशधा बाह्यमिंद्रियं त्रयस्यांतःकरणस्य विषयाख्यं विषयमाख्याति विषयाख्यं संकल्पा
भिमानाध्यवसायेषु कर्त्तव्येषु द्वारीभवति तत्र बुद्धींद्रियाण्यालोचनेन कर्मेन्द्रियाणि तु यथास्वव्यापारेण बाह्यांतरयोः करणयो विशि कारं २
वर्त्तमानकालं ३ षांतरमाह सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणं सांप्रतकाले बाह्यमिंद्रियं वर्त्तमानसमीपमनागतमतीतमपि वर्त्तमानमतो
वागपि वर्त्तमानकालविषया भवति त्रिकालमाभ्यंतरं करणं तद्यथा नदीपूरसेदास्ति वृष्टिरस्ति यस्मादिह नगानि कुंजे असत्यु
17 पुघाते पिपीलकांडसंचरणं भविष्यति वृष्टिरिति तदनुरूपाश्च संकल्पाभिमानाध्यवसाया भवंति कालश्च वैशेषिकाद्यभिमत ए
कोऽनागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हतीति तस्मादयमेष उपाधिभेदेऽनागतादिभेदं प्रतिपद्यते संतु त एवोपाधयोऽनागतादिव्य
वहारहेतवः कृतमत्रांतरगडुना कालेनेति सांख्याचार्याः तस्मान्न कालरूपतत्त्वांतराभ्युपगम इति ३२ सांप्रतकालानां बाह्येंद्रियाणां सांप्रतिकालविषयाणां
विषयं विवेचयति बुद्धींद्रियाणि तेषां पंच विशेषाविशेषविषयाणि वाग्भवति शब्दविषया शेषाणि तु पंचविषयाणि ३३ बुद्धींद्रिया
णि तेषां दशानामिंद्रियाणां मध्ये पंच विशेषाविशेषविषयाणि विशेषाः स्थूलाः शब्दादयः शांतघोरमूढाः पृथिव्यादिरूपाः अविशे
षास्तन्मात्राणि सूक्ष्माः शब्दादयः मात्रग्रहणेन स्थूलस्य तदभावमप्याकरोति विशेषाश्चाविशेषाश्च त एव विषया येषां बुद्धींद्रि व्या॰
बुद्धींद्रियेषु ५ याणां तानि तथोक्तानि तत्रोर्द्धस्रोतसां योगिनां च श्रोत्रं शब्दतन्मात्रविषयं स्थूलशब्दविषयं च अस्मदादीनां तु स्थूलशब्दविष
यमेव एवं तेषां त्वक् स्थूलसूक्ष्मस्पर्शविषया अस्मदादीनां स्थूलस्पर्शविषयैव एवं च चक्षुरादयोऽपि तेषामस्मदादीनां च रूपा
दिषु स्थूलसूक्ष्मेषु द्रष्टव्याः एवं कर्मेंद्रियेषु वाग्भवति शब्दविषया स्थूलशब्दविषया तद्धेतुत्वात् न तु शब्दतन्मात्रस्य हेतु वाक् ३
त्वं तस्याहंकारहेतुकत्वेन वागिंद्रियेण सहैककारणत्वात् शेषाणि तु चत्वारि पायूपस्थपाणिपादाख्यानि पंचविषयाणि पा
ण्याद्याहार्याणां घटादीनां पंचशब्दाद्यात्मकत्वादिति ३३ सांप्रतं त्रयोदशसु करणेषु केषांचिद्गुणभावं केषांचित्प्रधानभावं सहेतु २०.

स्थूलशब्दहेतुत्वात् ३

कस्माह सांतःकरणा बुद्धिः सर्वविषयमवगाहते यस्मात् तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि ३४ द्वारि प्रधानं शेषाणि करणानि
बाह्येंद्रियाणि द्वाराणि तैरुपनीतं विषयं समनोहंकारा बुद्धिः सर्वं यस्मादवगाहते ध्यवस्यति तस्माद्बाह्येंद्रियाणि द्वाराणि द्वारवती चसां
तःकरणा बुद्धिरिति ३४ न केवलं बाह्येंद्रियाण्यपेक्ष्य प्रधानं बुद्धिरपि तु येप्यहंकारमनसी द्वारिणी तेप्यपेक्ष्य बुद्धिः प्रधानमित्याह एते प्रदी
पकल्पाः परस्परविलक्षणा गुणविशेषाः कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छंति ३५ यथा हि ग्रामाध्यक्षाः कुटुंबिकेभ्यः करमादाय
विषयाध्यक्षाय प्रयच्छंति विषयाध्यक्षश्च सर्वाध्यक्षाय स च भूपतये तथा बाह्येंद्रियाण्यालोच्य मनसे समर्पयंति मनश्च संकल्प्याहं
कारायाहंकारश्चाभिमत्य बुद्धौ सर्वाध्यक्षभूतायै तदिदमुक्तं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छंति बाह्येंद्रियमनोहंकाराश्च गुणवि
गुणाः शेषाः गुणानां सत्त्वरजस्तमसां विकारास्ते तु परस्परविरोधशीला अपि पुरुषार्थेन भोगापवर्गरूपेणैकवाक्यतां नीताः यथा वर्तितैलव
ह्नयः संतमसापनयेन रूपप्रकाशाय मिलिताः प्रदीपा एवमेते गुणविशेषा इति योजना ३५ कस्मात्पुनर्बुद्धौ प्रयच्छंति न तु बुद्धिरहंकारा स्तानि
य द्वारिणो मनसे वेत्यत आह सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः सैव च विशिनष्टि पुनः प्रधानपुरुषांतरं सूक्ष्मं ३६ पुरु
पुरुषार्थस्य १ षार्थस्य प्रयोजनत्वात्तस्य यत्साक्षात्साधनं तत्प्रधानं बुद्धिश्च सा साक्षात्साधनं तस्मात्सैव प्रधानं यथा सर्वाध्यक्षः साक्षाद्राजार्थसा
गौणभूता ६ धनतया प्रधानमितरे तु ग्रामाध्यक्षादयः तं प्रति गुणभूताः बुद्धिर्हि पुरुषस्य सन्निधानात्तच्छायापत्त्या तद्रूपेव सर्वं विषयभोगं
साधयति सुखदुःखानुभवो भोगः स च बुद्धौ बुद्धिश्च पुरुषस्तद्रूपेवेति सा च पुरुषमुपभोजयति यथा ह्यालोचनसंकल्पाभिमानाः स्वत
तद्रूपपरिणामेन बुद्धावुपकौता तथेंद्रियादिव्यापारा अपि बुद्धेः स्वस्वव्यापारेणाध्यवसायेन सहैकव्यापारी भवंति यथा स्वसैन्येन सह
ग्रामाध्यक्षादिसैन्यं सर्वाध्यक्षस्य भवति सर्वं शब्दादिकं प्रति य उपभोगः पुरुषस्य तं साधयति ननु पुरुषस्य सर्वविषयोपभोगसंपाद
का यदि बुद्धिस्तर्हि निर्मोक्षप्रसंग इत्यत आह यस्मात्प्रधानपुरुषयोरंतरं विशेषं विशिनष्टि करोति यथौदनपाकं पचतीति ननु प्र
धानपुरुषयोरंतरस्य कृतकत्वादनित्यत्वं तत्कृतमोक्षस्यापीत्यत आह विशिनष्टि प्रधानं सविकारमन्यदहमन्य इति विद्यमान
कार्यत्वात्तस्मान्न कार्यस्यानित्यत्वनियमात् ।

...पावयं पचतीति सूक्ष्ममिति ... दंतरं १

सां०कौ० मेवांतरमविवेकेनाविद्यमानमिव बुद्धेर्बोधयतीति न तु तत्करोतीत्यर्थः करणं च प्रतिपादनं अनेनापवर्गः पुरुषार्थो बुद्धेर्दर्शितः सूक्ष्ममि
१८ ति दुर्लक्ष्यं तदंतरं ३६ तदेवं करणानि विभज्याविशेषाविशेषान्विभजते तन्मात्राण्यविशेषास्तेभ्यो भूतानि पंच पंचभ्यः एते स्मृता वि
18 शेषाः शांता घोराश्च मूढाश्च ३७ तन्मात्राण्यविशेषाः शब्दादितन्मात्राणि सूक्ष्माणि न चैषां शांतादिरस्त्युपभोगयोग्यो विशेष इति
मात्रशब्दार्थः अविशेषानुक्त्वा विशेषान्वक्तुमेषामुत्पत्तिमाह तेभ्यस्तन्मात्रेभ्यो यथासंख्यमेकद्वित्रिचतुः पंचभ्यो भूतान्याकाशानि
लानलसलिलावनिरूपाणि पंच पंचभ्यः अस्त्वेवमेषां भूतानामुत्पत्तिर्विशेषेषु किमायातमित्यत आह एते स्मृता विशेषाः
कुतः शांता घोराश्च मूढाश्च चकारो हेतौ द्वितीयः समुच्चये यस्मादाकाशादिषु स्थूलेषु सत्वप्रधानतया केचिच्छांताः सुखाः प्रकाशकाः
लघवः केचिद्रजःप्रधानतया घोराः दुःखाः अनवस्थिताः केचित्तमः प्रधानतया मूढा विषण्णा गुरवः तेमी परस्परव्यावृत्त्या
नुभूयमाना विशेषा इति स्थूला इति चोच्यंते तन्मात्राणि त्वस्मदादिभिरन्योन्यव्यावृत्तानि नानुभूयंते इत्यविशेषा इति सूक्ष्मा
इत्युच्यंत इति ३७ विशेषाणामवांतरविशेषव्यापारमाह सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः सूक्ष्मास्तेषां
नियता मातापितृजा निवर्त्तंते ३८ त्रिविधा विशेषाः स्युः तान्विशेषानाह सूक्ष्माः सूक्ष्मदेहाः मातापितृजाः षाट्कौशिकास्तत्र
मातृतो लोमलोहितमांसानि पितृतः स्नाय्वस्थिमज्जान इति षट् कोशाः प्रभूतानि महाभूतानि तैः सह सूक्ष्मशरीरमेको वि
शेषः मातापितृजो द्वितीयः महाभूतानि तृतीयः महाभूतसर्गश्च घटपटादीनां निवेश इति सूक्ष्ममातापितृजयोर्देहयोर्विशेष
माह सूक्ष्मास्तेषां विशेषाणां मध्ये ये ते नियताः मातापितृजा निवर्त्तंते ते हि अंता वा भस्मांता वा विडंता वेति ३८ सूक्ष्मशरीरं वि
भजते पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यंतं संसरति निरुपभोगं भावैरधिवासितं लिंगं ३९ पूर्वोत्पन्नं प्रधानेनादिस
र्गे प्रतिपुरुषमेकैकमुत्पादितं असक्तमव्याहतं शिलामप्यनुप्रविशतीति नियतं आ आदिसर्गादा च महाप्रलयादवतिष्ठते मह १८

भूम्यंताः ३८

दादिसूक्ष्मपर्यंतं महदहंकारैकादशेंद्रियपंचतन्मात्रपर्यंतं एतेषां समुदायः सूक्ष्मशरीरम् शांतैर्घोरैर्मूढैरिंद्रियैरन्वितत्वाद्विशे
षः ननु स एव तर्ह्येव शरीरं भोगाय तन्न पुरुषस्य कृतं दृश्यमानेन बद्धे षाट्कौशिकेन शरीरेण त्यत आह संसरतीति उपात्तमुपा
त्तं सूक्ष्मशरीरं संसरति ननु धर्माधर्मनिमित्तः संसारो न च सूक्ष्मस्य शरीरस्यास्ति तैर्योगस्तत्कथं संसरतीत्यत आह
भावैरधिवासितं लिंगम् धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याण्यष्टौ भावास्तदन्विता बुद्धिस्तदन्वितं सूक्ष्म
शरीरमिति तदपि भावैरधिवासितं यथा सुरभिचंपककुसुमसंपर्काद्वस्त्रं तदामोदवासितं भवति तस्माद्भावैरधिवासितत्वात्सं
सरतीति भावः ४० कस्मात्पुनः प्रधानमिव महाप्रलयेऽपि तच्छरीरं न तिष्ठतीत्यत आह लिंगं लयं गच्छतीति लिंगहेतुमत्त्वेनास्य लिंग
त्वम् आदिसर्गे तद्बुद्धिरेव साहंकारेंद्रिया कस्मान्न संसरति तत्सूक्ष्म शरीरेणाश्रयमात्रिकेणेत्यत आह चित्रं यथा
सरणा५ = पाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिंगं ४० लिंगनाज्ञापनाद्बुद्ध्यादेर्ली
लिंगं तदेवाश्रयं न तिष्ठति जन्मप्राप्ताणां तरालेवुद्ध्यादयः प्रत्युत्पन्नशरीराश्रयाः प्रत्युत्पन्नपंचतन्मात्रत्वे सति बुद्ध्या ॥श्रितावा५
दित्वात् दृश्यमानशरीरवर्त्ति बुद्ध्यादिवत् विना विशेषैरिति सूक्ष्मैः शरीरैरित्यर्थः अगमात्रमात्रं भवति अंगुष्ठमात्रं पु
रुषं निश्चकर्ष बलाद्यम इति अंगुष्ठमात्रत्वेन सूक्ष्मशरीरत्वमुपलक्षयतीत्यत्र लक्षणोनिष्कर्षासंभवेन सूक्ष्ममेव शरीरं पुरु
षस्तदपि हि पुरि स्थूले शरीरे शेत इति ४० एवं सूक्ष्मशरीरास्तित्वमुपपाद्य यथा संसरति येन हेतुना च तदुभयमाह पुरुषार्थ
हेतुकमिदं निमित्तनैमित्तिकप्रसंगेन प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिंगं ४१ पुरुषार्थेन हेतुना प्रयुक्तं
ततः संसरति कायात्पाशावर्त्तंदं ततं

वास्मीकादीनाम् = ८

सां॰कौ॰ १९ निमित्तं धर्माधर्मादि नैमित्तिकं तेषु तेषु निकायेषु याट्कौशिकशरीरपरिग्रहः स हि धर्मादि निमित्तप्रभवः निमित्तं
च नैमित्तिकं च तत्त्वयः प्रसंगः प्रसक्तिस्तया नटवद्व्यवतिष्ठते लिंगं सूक्ष्मशरीरं यथा हि नटस्तां तां भूमिं विधाय रामो
वा जातशत्रुर्वा वत्सराजो वा भवत्येवं तत् स्थूलशरीरग्रहणाद्देवो वा मनुष्यो वा पशुर्वा वनस्पतिर्वा भवति सूक्ष्मश नानाविधत्व = ४
रीरमित्यर्थः कृतस्य पुनरस्य ह्येश्य सामर्थ्यमित्यत आह प्रकृतेर्विभुत्वयोगात् तथा च पुराणे वैश्वरूप्यात् प्रधानस्य प
रिणामोयमद्भुतः ४१ निमित्तनैमित्तिकप्रसंगेन तु के ते निमित्तनैमित्तिके विभजते सांसिद्धिकाश्च भावाः प्राकृति
का वैकृताश्च धर्माद्याः दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कलिलाद्याः ४२ प्राकृतिका नैमित्तिकाः सांसि
द्धिकभावाः स्वाभाविका इति यावत् तथा हि सर्गादावादिविद्वान् तत्र भगवान् कपिलो महामुनिः धर्मज्ञानवैरा
ग्यैश्वर्यसंपन्नः प्रादुर्बभूवेति स्मरंति वैकृतिकाश्च भावा असांसिद्धिका उपायानुष्ठानेनोत्पन्नाः यथा प्रचेतसप्रभृती
नां परमर्षीणाम् एवमधर्माज्ञानावैराग्यानैश्वर्याण्यपि कार्यं शरीरं तदाश्रयिणः अस्यावस्थाः कलिलबुद्बुदमांस
पेशीकण्डशिरोबाहुमुखाद्यंगप्रत्यंगव्यूहा गर्भस्थस्य ततो निर्गतस्य बालकौमारयौवनवार्धकानीति ४२ अवगता
नि निमित्तनैमित्तिकानि कतमस्य तु निमित्तस्य कतमन्नैमित्तिकमित्यत आह धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भव
त्यधर्मेण ज्ञानेन चापवर्गो विपर्ययादिष्यते बंधः ४३ धर्मेण गमनमूर्ध्वं द्युप्रभृतिषु लोकेषु गमनमधस्ताद्भवत्य
धर्मेण सुतलादिषु ज्ञानेन चापवर्गस्तावदेव प्रकृतिर्भोगमारभते न यावद्विवेकख्यातिं करोति अथ यस्या विवेकख्या
तौ सत्यां कृतकृत्यतया विवेकख्यातिमंतं पुरुषं प्रति निवर्तते यथाहुः विवेकख्यातिपर्यंतं ज्ञेयं प्रकृतिचेष्टितमिति १९

स्थूलशरीरम्

[illegible]

प्रकृतौ लीयंत इति प्रकृतिलयास्तान्=२

कर्माणि इष्टयागः पूर्तखातादिः ४

या२ अ२

विपर्ययादतत्त्वज्ञानादिष्यते बंधः स च त्रिधा प्राकृतिको वैकृतिको दाक्षिणश्चेति तत्र प्रकृतावात्मज्ञानाद्ये प्रकृतिमुपास

ते तेषां प्राकृतिको बंधः पर्वेषु पुराणे प्रकृतिलयास्त्वभ्युच्यते पूर्णं शतसहस्रं हि तिष्ठंत्यव्यक्तचिंतका इति वैकारिको बं

धस्तेषां ये विकारानेव भूतेंद्रियाहंकारबुद्धीः पुरुषबुद्ध्योपासते तानप्रतीदमुच्यते दशमन्वंतराणीह तिष्ठंतींद्रियचिंतकाः

बुद्ध्युपासकाः४ भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः बौद्धा दशसहस्राणि तिष्ठंति विगतज्वराः पुरुषं निर्गुणं प्राप्य कालसंख्या

५ बंधः= न विद्यते तेरवल्वमी विदेहा येषां वैकृतिको बंधः इष्टापूर्तेन दाक्षिणः पुरुषतत्त्वानभिज्ञो हि इष्टापूर्तकारी कामोपहतम

ना बध्यत इति ४३ वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात् ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः ४४ वै

राग्यात्प्रकृतिलयः पुरुषतत्त्वानभिज्ञस्य वैराग्यमात्रात्प्रकृतिलयः प्रकृतिग्रहणेन प्रकृतिमहदहंकारभूतेंद्रिया

णि गृह्यंते तेष्वात्मबुद्ध्योपास्यमानेषु लयः कालांतरेण च पुनराविर्भवतीति संसारो भवति राजसाद्रागात् राजसादि

ति तदेव करोति विपर्ययादनैश्वर्यात्तद्विपर्यासः सर्वत्रेच्छाविघात इत्यर्थः ४६ बुद्धिधर्मा धर्मादीनष्टौ भावान् समास

व्यासाभ्यामुपदर्श्य हेयोपादेयभावेन दर्शयितुं प्रथमं तावत्समासमाह एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसि

द्ध्याख्यः गुणवैषम्यविमर्दात्तस्य च भेदास्तु पंचाशत् ४५ प्रतीयतेऽनेनेति प्रत्ययो बुद्धिस्तस्याः सर्गः तत्र विपर्ययोऽ

ज्ञानमविद्या सा बुद्धिधर्मः अशक्तिरपि करणवैकल्यहेतुको बुद्धिधर्म एव तुष्टिसिद्धी अपि वक्ष्यमाणे बुद्धिधर्मावे

व तत्र विपर्ययाशक्तितुष्टिषु यथायोगं सत्त्वानां धर्मादीनां ज्ञानवर्जमंतर्भावः सिद्धौ च ज्ञानस्येति व्यासमाह तस्य च

धर्माधर्मवैराग्यावैराग्यैश्वर्यानैश्वर्याज्ञानानां१ अंतर्भावः=१ प्रत्ययसर्गस्य

सां०कौ० भेदास्तु पंचाशदिति कस्माद्गुणवैषम्यविमर्दात् गुणानां वैषम्यमेकैकस्याधिकबलताद्वयोर्वा एकैकस्य न्यूनबल
२० ताद्वयोर्द्वयोर्वा तेन न्यूनाधिकभावेन यस्याधिमात्रतया यथा कार्यभेदो नीयते तदिदं गुणानां वैषम्यं तेनोपमर्दः एकैक
स्य न्यूनबलस्य द्वयोर्द्वयोर्वाभिभवस्तस्मात्तस्य भेदाः पंचाशत् ४५ तानेव पंचाशद्भेदान् गणयति पंचविपर्यय
भेदा भवंत्यशक्तिश्च करणवैकल्यात् अष्टाविंशतिभेदा तुष्टिर्नवधा सिद्धि ४६ अविद्यास्मितारागद्वेषाभिनिवेशाः ऽमि॰४
यथासंख्यं तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञाः पंचविपर्ययस्य विशेषाः विपर्ययप्रभवानामप्यस्मिता
आचार्य॰१ दीनां विपर्ययस्वभावत्वात् यद्वा यदविद्यया विपर्ययेणावधार्यते वस्तु अस्मितादयस्तु तत्स्वभावाः संतस्तदभिनि
यतः पंचविपर्यस्य भेदास्तु विशंते अत एव पंचपर्वाविद्येत्याह वार्षगण्यः ४६ भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः तामिस्रो
लादव=१ ऽष्टादशधा तथा भवत्यंधतामिस्रः ४७ भेदस्तमसोऽविद्याया अष्टविधः अष्टास्वव्यक्तमहदहंकारपंचतन्मात्रेष्वना
त्मस्वात्मबुद्धिरविद्या तमः तमसोऽष्टविषयत्वादष्टविधत्वं मोहस्य चात्र चाष्टविधो भेद इति चकारेणानुषज्यते ।
देवा ह्यष्टविधमैश्वर्यमासाद्यामृतत्वाभिमानिनः अणिमादिकमात्मीयं शाश्वतिकमभिमन्यंत इति सोऽयमस्मिता
मोहोऽष्टविधैश्वर्यविषयत्वादष्टविधः दशविधो महामोहः शब्दादिषु पंचसु दिव्यादिव्यतया दशविधेषु विषयेषु रं
जनीयेषु रागस्त्रासक्तिर्महामोहः स च दशविषयत्वाद्दशविधः तामिस्रोऽष्टादशधा शब्दादयो दशविषया रंजे
नीयाः स्वरूपतः ऐश्वर्यमणिमादिकं न स्वरूपतो रंजनीयं किंतु रंजनीयशब्दाद्युपायः ते च शब्दादय उपस्थिताः प स्प॰२
रेणोपहन्यमानास्तदुपायाश्चाणिमादयः स्वरूपेणैव कोपनीया भवंतीति शब्दादिभिर्दशभिः सहाणिमाद्यष्ट । २०

कमष्टादशधेति तद्विघातहेतुस्तामिस्रोष्टादशविषयत्वादष्टादशधेति तथा भवत्यंधतामिस्र इति अभिनिवेशस्त्रासों
धतामिस्रस्तथेत्यनेनाष्टादशधेत्यनुषज्यते देवाः खल्वणिमादिकमष्टविधमैश्वर्यमासाद्य दशशब्दादीन्भुंजा
नाः शब्दादयो भोग्यास्तदुपायाश्चाणिमादयोस्माकमसुरादिभिर्मा विघातयिष्यंतीति बिभ्यति तदिदं भयमभिनिवे
शोंधतामिस्रोष्टादशविषयत्वा दष्टादशधेति सोयं पंचविपर्ययो वांतरभेदाद्द्वाषष्टिरिति ४७ तदेवं पं
चविधविपर्ययभेदानुक्त्वाष्टाविंशतिभेदामशक्तिमाह एकादशेंद्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा स
प्तदशधा च बुद्धेर्विपर्ययात्तुष्टिसिद्धीनां ४८ एकादशेंद्रियवधाः बाधिर्यं कुष्ठितांधत्वं जडताजिघ्रता तथा
मूकता कौण्यं पंगुत्वं क्लैब्यमुदावर्तो मंदता यथासंख्यं श्रोत्रादीनामिंद्रियाणां वधाः एतावत्येव तु तद्धेतुका बुद्धेरशक्तिः
वधः स्वव्यापारे भवति तथा चैकादशहेतुकत्वादेकादशधा बुद्धेरशक्तिरित्युच्यते हेतुहेतुमतोरभेदविवक्षया च सामाना
धिकरण्यं तदेवमिंद्रियवधद्वारेण बुद्धेरशक्तिमुक्त्वा स्वरूपतोशक्तिमाह सहबुद्धिवधैरिति कति बुद्धेः स्वरूपतो वधा
इत्यत आह सप्तदशधा च बुद्धेरिति कुत विपर्ययात्तुष्टिसिद्धीनामिति तुष्टयो नवधेति तद्विपर्ययास्तन्निरूपणा
न्नव वधा भवंति एवं सिद्धयोष्टाविति तद्विपर्ययास्तन्निरूपणादष्टौ भवंति ४८ तुष्टिर्नवधेत्युक्तं ताः परिगणय
ति आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः बाह्या विषयोपरमात्पंच नव तुष्टयोभिहिताः ४९
प्रकृतिव्यतिरिक्त आत्मास्तीति प्रतिपद्य यस्य श्रवणमननेस्तः विवेकसाक्षात्काराय त्वसदुपदेशतुष्टो यो
न प्रवर्तते तस्य चतस्र आध्यात्मिकास्तुष्टयो भवंति प्रकृतिव्यतिरिक्त आत्मानमधिकृत्य यस्मात्तास्तुष्टयस्ता

सां॰कौ॰ २१ ॥ आध्यात्मिकाः कास्ता इत्यत आह प्रकृत्युपादानकालभाग्याख्या इति प्रकृत्यादिराख्या यासां तास्तथोक्ता इति
॥ तत्र प्रकृत्याख्यानुष्टिर्यथा कस्यचिदुपदेशो विवेकसाक्षात्कारो हि प्रकृतेः परिणामभेदः तं च प्रकृतिरेव करोतीति
॥ कृतं ते ध्यानाभ्यासेन तस्मादेवमेवास्व वत्सेति प्रतिपन्नस्य शिष्यस्य प्रकृतौ या तुष्टिः सा प्रकृत्याख्यातु
पू॰ नि॰ ४ ॥ ष्टिरंभ उच्यते यातु प्राकृती क्यपि विवेकख्यातिर्न प्रकृतिमात्राद्भवति मा भूत् सर्वस्य सर्वदा तन्मात्रस्य सर्वा
॥ न्प्रत्यविशेषात् प्रव्रज्यायास्तु सा भवति तस्मात्प्रव्रज्यामुपाददीथाः कृतं ते ध्यानाभ्यासेनायुष्मन्नित्युपदेशे
॥ तुष्टिः सोपादानाख्या सलिलमुच्यते यातु प्रव्रज्यापि सद्यो न निर्वाणदेति सैव कालं परिपाकं लब्ध्वा सिद्धिं विधास्यत्य परिणामः
॥ लमुत्तप्ततया तवेत्युपदेशे तुष्टिः सा कालाख्या ओघ इत्युच्यते यातु न कालान्नाप्युपादानाद्विवेकख्यातिरपितु भाग्यादेवात एव मदालसाप मेष्या
त्यानि बालान्यपि मातुरुपदेशमात्राद्विवेकख्यातिमन्ति मुक्तानि च भवन्ति तस्माद्भाग्यमेव हेतुर्नान्यदित्युपदेशे तुष्टिः सा भाग्याख्या तुष्टिर्वृ
ष्टिरुच्यते बाह्या दर्शयति बाह्या इति बाह्यास्तुष्टयो विषयोपरमाच्च पञ्च ॥ खल्वनात्मनः प्रकृतिमहदहंकारादीनात्मत्वेनाभिमन्यमानस्य वै
राग्ये सति तुष्टयस्ता बाह्याख्याः आत्मज्ञानिनो ह्यनात्मन्यभिमानिनः प्रकृत्यादावात्माभिमानिनः वैराग्ये सति संभवन्ति तुष्टय इति वैराग्यहेतु
पंचत्वाद्वैराग्याणि पंच तत्संचत्वात्तुष्टयः पंचेति उपरम्यतेऽनेनेत्युपरमो वैराग्यं विषयादुपरमो विषयोपरमः विषया भोग्याः
पंच शब्दादयस्तेभ्य उपरमाश्चापि पंच तथा हि अर्जनरक्षणक्षयभोगहिंसादोषदर्शनहेतुजन्मान उपरमाः पंच भवन्ति तथा
हि सेवादयो धनार्जनोपायास्ते च सेवकादीनां दुःखाकरा इति दृप्तदुरीश्वरद्वाःस्थदण्डचण्डाईचन्द्रमीवेदनं भावयत्प्रासङ्ग
कः सेवासु प्रसज्यते एवमन्ये प्यर्जनोपाया दुःखा इति विषयोपरमे या तुष्टिः सेषा पारमुच्यते तथार्जितमपि धनं राजकौरा
ग्निजलौघादिभ्यो विनङ्क्ष्यतीति तद्रक्षणे महद्दुःखमिति भावयतो विषयोपरमे या तुष्टिः सा द्वितीया सुपारमुच्यते तथा २१
चौरैकागारिकातेना...

एवं रक्षतस्य विच्छिन्नं काले न क्षीयते इति भावयतो या तुष्टिः सा तृतीया तिपारमुच्यते २ हि
महता यासेनार्जितं धनं भुज्यमानं क्षीयते इति तत्क्षयं भावयतो विषयोपरमे या तुष्टिः सा पितृतीया पारापारमुच्यते एवं शब्दा
दिभोगाभ्यासाद्वर्धन्ते कामास्ते च विषयाप्राप्तौ कामिनं दुःखयन्तीति भोगदोषं भावयतो विषयोपरमे या तुष्टिः सा चतुर्थी अ
नुत्तमाम्भ उच्यते एवं नानुपहत्य भूतानि विषयोपभोगाः भवंतीति हिंसादोषदर्शनाद्विषयोपरमे या तुष्टिः सा च पंचमी उत्त
माम्भ उच्यते तदेवमाध्यात्मिकाभिश्चतस्रभिर्बाह्याभिः पंचभिर्नव तुष्टयोऽभिहिताः ४९ गौणमुख्यभेदभिन्नाः सिद्धीराह
ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ५० विहन्यमानस्य दुःख
त्रयस्य त्रित्वात्तद्विघातास्त्रय इति इमा मुख्यास्तिस्रः सिद्धयः दुःखविघातोपायतया चेतराः पंच गौण्यः सिद्धयः ताश्च हेतु
हेतुमत्तया व्यवस्थिताः तत्राद्याध्ययनलक्षणा सिद्धिर्हेतुरेव मुख्यास्तु सिद्धयो हेतुमत्य एव मध्यस्था हेतुहेतुमत्यः विधिव
द्गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणमध्ययनं प्रथमा सिद्धिस्तारमुच्यते तदर्थः शब्द इति शब्दजनितमर्थज्ञान
मुपलक्षयति कार्ये कारणोपचारात् सा द्वितीया सिद्धिः सुतारमुच्यते तदिदं द्विधा श्रवणं ऊहः तर्कः आगमाविरोधिना न्या
परीक्षणं १ यनागमार्थपरीक्षणं च संशयपूर्वपक्षनिराकरणोत्तरपक्षव्यवस्थापनं तदिदं मननमाख्यायते आगमिभिः सा तृती
या सिद्धिस्तारतारमुच्यते सुहृत्प्राप्तिः न्यायेन स्वयं परीक्षितमप्यर्थं न श्रद्धत्ते न यावद्गुरुशिष्यसब्रह्मचारिभिः सह संवा
स५ द्यतेऽतः सुहृद्गुरुशिष्यसब्रह्मचारिणां संवादिकानां प्राप्तिः सुहृत्प्राप्तिः सा सिद्धिश्चतुर्थी रम्यक उच्यते दानं च शुद्धिः विवेक
ज्ञानस्य दैप् शोधने इत्यस्माद्धातोर्दानपदव्युत्पत्तेः यथाह भगवान्पतञ्जलिः विवेकख्यातिरविप्लवा हानोपाय इति अविप्लवा शु
द्धिः सा च सवासनसंशयविपर्ययाणां परिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहेऽवस्थापनं सा च न विनादरनैरन्तर्यदीर्घकालसे
विताभ्यासपरिपाकाद्भवतीति दानेन विवेकख्यातेरुपकार्यत्वात्सापि संगृहीता सेयं पंचमी सिद्धिः सदामुदितमुच्यते तिस्रश्च मु
ख्याः सिद्धयः प्रमोदमुदितमोदमाना इत्यष्टौ सिद्धयः अन्ये तु व्याचक्षते विनोपदेशादिना प्राग्भवीयाभ्यासवशात्तत्त्वस्य यत्

सां०कौ० हत्वेसासिद्धिरूहः यस्य सांख्यशास्त्रपाठमन्यदीयमाकर्ण्य तज्ज्ञानमुत्पद्यते सा सिद्धिः शब्दः शब्दपाठानंतरं भावितत्वात् यस्य
२२ शिष्याचार्यसंबंधेन सांख्यशास्त्रं ग्रंथतोर्थतश्चाधीत्य ज्ञानमुत्पद्यते साध्ययनहेतुका सिद्धिरध्ययनं सुहृत्प्राप्तिरिति यस्या
धिगततत्त्वं सुहृदं प्राप्य ज्ञानमुत्पद्यते सा ज्ञानलक्षणा सिद्धिः सुहृत्प्राप्तिः दानं च सिद्धिहेतुः धनादिदानेनाराधितो ज्ञानी ज्ञानं
प्रयच्छतीति अस्य च मुख्यत्वं च लघुत्वं सूरिभिरेवावगंतव्यमिति कृत्वा परदोषो दुष्टेनेन नः सिद्धांतमात्रमारब्धानां तत्पराणामिति सिद्धि
तुष्टि विपर्ययाशक्तिबुद्धिवधः सप्तदशधा द्रष्टव्याः अत्र प्रत्ययसर्गे सिद्धिरुपादेयेति प्रसिद्धमेव तन्निराकरणहेतवस्तु विप
र्ययाशक्तितुष्टयो हेया इत्याह सिद्धेः पूर्वोंकुशस्त्रिविध इति पूर्व इति विपर्ययाशक्तितुष्टीः परामृशति ताः सिद्धिकरीणा
मंकुशो निवारकत्वात् अतः सिद्धेः परिपंथित्वादंकुशा एवेति विपर्ययाशक्तितुष्टयो हेया इत्यर्थः ५० स्यादेतत् पुरुषार्थप्रयु
क्तः सृष्टिः स च पुरुषार्थः प्रत्ययसर्गाद्वा तन्मात्रसर्गाद्वा सिध्यतीति कृतमुभयसर्गेणेत्यत आह न विना भावैर्लिंगं न विना लिं
गेन भावनिर्वृत्तिः लिंगाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्त्तते सर्गः ५१ लिंगमिति तन्मात्रसर्गमुपलक्षयति भावैरिति च प्र
त्ययसर्ग एतदुक्तं भवति तन्मात्रसर्गस्य पुरुषार्थसाधनत्वं स्वरूपं च नहि प्रत्ययसर्गं विना एवं प्रत्ययसर्गस्य स्वरूपं च पुरुषार्थसा
धनत्वं च न तन्मात्रसर्गादृते तस्मादुभयसर्गप्रवृत्तिः भोगः पुरुषार्थो न भोग्यान् शब्दादीन् विहाय भोगायतनं च शरीरद्वयं भव
उः५४ तीत्युपपन्नस्तन्मात्रसर्गः एवं साधनानि भोगसाधनानीन्द्रियाणि तैः करणानि विना तेन संभवति न च तानि धर्मादीन् भावा
न्विना न चायं कहि हेतुर्विवेकख्यातिरूपः सर्गः विनेत्युपपन्नो उभयविधः सर्गः अनादित्वाच्च बीजांकुरवदन्योन्याश्रयदो
षं नावहति कल्पादावपि प्राग्भवीयकल्पोत्पन्नभावलिंगसंस्कारवशाल्लिंगभावयोरुत्पत्तिर्नानुपपन्नेति सर्व
मवदातं विभक्तः प्रत्ययसर्गस्तन्मात्रसर्गं विभजते अष्टविकल्पो दैवस्तैर्यग्योनश्च पंचधा भवति मानुष्यश्चैकविधः स
मासतो भौतिकः सर्गः ५२ अष्टविकल्पो दैवः सर्गः ब्राह्मप्राजापत्यऐन्द्रपैत्रगांधर्वयाक्षराक्षसपैशाचा इति तैर्यग्योन २२

प्रपंचविधो भवति पशुमृगपक्षिसरीसृपस्थावराः मानुषश्चैकविधः ब्राह्मणत्वाद्यवांतरजातिभेदाविवक्षया संस्थानस्य
चतुष्पाद्विशेषादिति समासतः संक्षेपतो भौतिकः सर्गः घटादयस्त्वशरीरत्वेपि स्थावरा एवेति ५२ भौतिकस्य सर्गस्य चैत
न्योत्कर्षनिकर्षतारतम्याभ्यामूर्ध्वाधोमध्यभावेन त्रैविध्यमाह ऊर्ध्वं सत्वविशालस्तमोविशालश्च मूलतः सर्गः मध्ये र
जोविशालो ब्रह्मादिस्तंबपर्यंतः ५३ ऊर्ध्वं सत्वविशालो द्युप्रभृतिः सत्यांतो लोकः सत्वबहुलः तमोविशालश्च मूलतः प
सर्गः पश्वादिस्थावरांतः सोपं मोहमयत्वात्तमोबहुलः भूर्लोकस्तु सप्तद्वीपसमुद्रसन्निवेशविशेषो मध्ये रजोविशालः ध
र्मानुष्ठानपरत्वाद्दुःखबहुलत्वाच्चेतामिमां लोकसंस्थितिं दर्शयति ब्रह्मादिस्तंबपर्यंत स्तंबग्रहणेन वृक्षादयः संगृहीताः
५३ तदेवं सर्गं दर्शयित्वा तस्यापवर्गसाधनवैराग्याय योगिनी दुःखहेतुतामाह तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरु
षः लिंगस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन ५४ तत्र शरीरादौ यद्यपि विविधविचित्रानंदभोगभागिनः प्राणभृद्भेदास्त
थापि सर्वेषां जरामरणकृतं दुःखमविशिष्टं सर्वस्य खल्वाकृमेरपि मरणत्रासो माभूवं भूयासमित्येवमात्मकोस्ति दुःखं च भय
हेतुरिति मरणं दुःखं स्यादेतत् सुखदुःखादयः प्राकृताः बुद्धिगुणास्तत्कथमेते चेतनोपि तत्संबंधि [illegible] भवतीत्यत नो ६
उक्तं पुरुष इति पुरि लिंगे शेते इति पुरुषः लिंगं च तत्संबंधीति चेतनोपि तत्संबंधी भवतीत्यर्थः कुतः पुनः लिंगसंबंधि दुःखं
चेतनस्यापि पुरुषस्येत्यत आह लिंगस्याविनिवृत्तेः पुरुषाद्भेदाग्रहात् लिंगधर्मानात्मन्यध्यवस्यति पुरुषः अथवा दुःखप्रा
प्तावबधिरुक्तः कथ्यते लिंगं यावन्न निवर्तते तावदिति ५४ उक्तस्य सर्गस्य कारणविप्रतिपत्तिं निराकरोति इत्येष प्रकृतिकृ
तो महदादिविशेषभूतपर्यंतः प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरंभः ५५ आरभ्यत इत्यारंभः सर्गः प्रकृत्यैव कृतो ने
श्वरेण न ब्रह्मोपादानो नाप्यकारणकः अकारणत्वे हि तत्त्वं तदभावो वा स्यात् नापि ब्रह्मोपादानः चितिशक्तेरपरिणामात्

नेश्वराधिष्ठितप्रकृतिकृतः निर्व्यापारस्याधिष्ठातृत्वासंभवात् नहि निर्व्यापारस्तक्षा वास्याद्यधितिष्ठति ननु प्रकृतिकृतमेत
स्याः नित्यायाः प्रवृत्तिशीलाया अनुपरमात् सर्वदैव सर्गः स्यादिति न कश्चिन्मुच्येतेत्यत आह प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ
आरंभः यथौदनाय पाके प्रवृत्त ओदनकाम ओदनसिद्धौ निवर्तते एवं प्रत्येकं पुरुषान्मोचयितुं प्रवृत्ता प्रकृतिर्यं यं पुरुषं मोचय
त्यवती तं तं प्रति न पुनः प्रवर्तते तदिदमाह स्वार्थ इव स्वार्थो यथा तथा परार्थः आरंभ इत्यर्थः ५५ स्यादेतत् स्वार्थं परार्थं वाभिसंधाय
चेतनः प्रवर्त्तते न च प्रकृतिरचेतनैवं प्रवर्तितुमर्हति तस्मादस्ति प्रकृतेरधिष्ठाता चेतनः न च क्षेत्रज्ञाश्चेतना अपि प्रकृतिमधि
ष्ठातुमर्हन्ति तेषां प्रकृतिस्वरूपानभिज्ञत्वात् तस्मादस्ति सर्वार्थदर्शी प्रकृतेरधिष्ठाता स चेश्वर इति अत आह वत्सविवृद्धिनिमि
त्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ५६ दृष्टमचेतनमपि प्रयोजनेन प्रवर्तमानं
यथा वत्सविवृद्ध्यर्थं क्षीरमचेतनमपि प्रवर्तते एवं प्रकृतिरचेतनापि पुरुषविमोक्षाय प्रवर्त्स्यतीति न च क्षीरप्रवृत्तेरपीश्वराधि
ष्ठाननिबंधनत्वेन साध्यत्वान्न साध्यैर्व्यभिचार इति सांप्रतं प्रेक्षावत्प्रवृत्तेः स्वार्थकारुण्याभ्यां व्याप्तत्वात् ते च जगत्सर्गा
द्व्यावर्त्तमाने प्रेक्षावत्प्रवृत्तिपूर्वकत्वमपि निवर्त्तयतः नह्यवाप्तसकलेप्सितस्य भगवतः सृज्यमाने जगति किमप्य
भिलषितं भवतीति नापि कारुण्यादस्य सर्गप्रवृत्तिः प्राक्सर्गाज्जीवानामिंद्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्र
हाणेच्छा यत्कारुण्यं सर्गोत्तरकालं दुःखिनो वीक्ष्य कारुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयत्वं कारुण्येन सृष्टिः
सृष्ट्या च कारुण्यमिति अपि च करुणया प्रेरित ईश्वरः सुखिन एव जन्तून् सृजेन्न विचित्रान् कर्मवैचित्र्याद्वैचित्र्यमिति
चेत् कृतमस्य प्रेक्षावतः कर्माधिष्ठानेन तदनधिष्ठानमात्रादेव शरीरेंद्रियविषयानुत्पत्तौ दुःखानुत्पत्तेरपि सुलभत्वा
त् प्रकृतेस्त्वचेतनायाः प्रवृत्तेर्न स्वार्थग्रहो न कारुण्यं प्रयोजकमिति नोक्तदोषप्रसंगावतारः परार्थमात्रं तु प्रयोजक

मुपपद्यते तस्मात्सुष्ठूक्तं वत्सविवृद्धिनिमित्तमिति ५६ स्वार्थ इवेति दृष्टांतं विभजते औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्र
वर्त्तते लोकः पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तं ५७ औत्सुक्यमिच्छा सा खल्विष्यमाणप्राप्तौ निवर्त्तते इष्यमाणश्च स्वा
र्थ इष्टलक्षणं फलं स्पर्द्धा दार्ष्टान्तिके योजयति पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम् ५७ ननु भवतु पुरुषार्थः प्र
वृत्तेः प्रवर्त्तको निवृत्तिस्तु कुतः स्यात्प्रकृतेरित्यत आह रंगस्य दर्शयित्वा यथा निवर्त्तते नर्त्तकी न स्यात् पुरुषस्य तथात्मा
नं प्रकाश्य विनिवर्त्तते प्रकृतिः ५८ रंगस्येति स्थानेन स्थानिनः पारिषदानुपलक्षयति आत्मानं शब्दाद्यात्मना पुरुषा
द्भेदेन च प्रकाश्येत्यर्थः ५८ स्यादेतत्प्रवर्त्ततां प्रकृतिः पुरुषार्थं पुरुषादुपकृता प्रकृतिर्लप्स्यते कं विदुपकारमा
ज्ञासंपादनाराधितादिवाज्ञापयतुर्भर्त्तुर्जिज्ञासा तथा च न परार्थोऽस्या आरंभ इत्यत आह नानाविधैरुपायैरुपका
रिण्यनुपकारिणः पुंसः गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ५९ यथा गुणवानप्युपकार्यपि भृत्यः निर्गुणं त
एवानुपकारिणि स्वामिनि निष्फलाराधनः एवमियं प्रकृतिर्गुणवत्युपकारिण्यनुपकारिणि निर्गुणे पुरुषे व्या^
र्थं परमिति पुरुषार्थमेव प्रयतते न स्वार्थमिति सिद्धं ५९ स्यादेतन्नर्त्तकीव स्वपारिषदेभ्यो दर्शयित्वा निवृत्तापि
पुनस्तत्कुतूहलात्प्रवर्त्तते यथा तथा प्रकृतिः पुरुषायात्मानं दर्शयित्वा निवृत्तापि पुनः प्रवर्त्स्यतीत्यत आह प्रकृतेः सुकुमा
रतरं न किंचिदस्तीति मे मतिर्भवति या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ६१ सुकुमारतरतातिपेलवता परपुरुषा
घसहिष्णुतेति यावत् असूर्यंपश्या कुलवधूरतिमंदाक्षमंथरा प्रमादाद्विगलितसिचयांचला चेदवलोक्यते पुरुषेण त^ पर ३
दासौ तथा प्रयतते प्रमत्ता यथैनां पुरुषान्तराणि न पुनः पश्यंतीत्येवं प्रकृतिः कुलवधूतोऽप्यधिकतरा दृष्टा विवेकेन पु^
नर्न द्रक्ष्यत इत्यर्थः ६१ स्यादेतत्पुरुषोऽपरिणामी कथमस्य मोक्षः मुचेर्बंधनविश्लेषार्थत्वात् सवासनक्लेशकर्मा

विगलितवस्त्रान्ता-२

सां॰कौ॰
२४

९५

शयानां च बंधनसमाख्यानां पुरुषेऽपरिणामिन्यसंभवात् अत एव नास्य पुरुषस्य संसारः प्रेत्यभावापरनामास्ति निष्क्रिय
त्वात् तस्मात्पुरुषविमोक्षार्थमिति रिक्तं वचः इति मीमांसकानुपसंहारव्याजेनाभ्युपगच्छन्नपाकरोति तस्मान्न बध्यतेऽद्धा नापि
मुच्यते नापि संसरति कश्चित् संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ६२ बध्यते कस्तर्हीत्यत आह संसरति ब
ध्यते मुच्यते चेति अद्धा न कश्चित्पुरुषो बध्यते न कश्चित्पुरुषः संसरति न कश्चित्पुरुषो मुच्यते इति प्रकृतिरेव तु नानापु
रुषाश्रया सती बध्यते संसरति मुच्यते चेति बंधमोक्षसंसाराः पुरुष उपचर्यंते यथा जयपराजयौ भृत्यगतावपि स्वामिन्यु
पचर्यते तदाश्रयेण भृत्यानां तद्भागित्वात् तत्फलस्य शोकलाभादेः स्वामिनि संबंधात् भोगापवर्गयोः प्रकृतिगतयोरपि
विवेकाग्रहात्पुरुषे संबंध उपपादित इति पुष्कलं २१ नन्वबंधादयः प्रकृतिगता बंधसंसारापवर्गाः पुरुष उपचर्यंते इति किं सर्वं
साधनाः पुनरेते प्रकृतेरित्यत आह रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः सैव च पुरुषार्थं प्रति विमोचयत्येकरू
पेण ६३ ज्ञानवर्जं धर्मादिभिः सप्तरूपैरिति पुरुषार्थं प्रति भोगापवर्गं प्रति विमोचयत्यात्मानमेकरूपेण तत्त्वज्ञानेन विवे
कख्यात्या विमोचयति पुनर्भोगापवर्गौ न करोतीति तात्पर्यार्थः ६३ अवगतमीदृशं तत्त्वं ततः किमित्यत आह एवं तत्त्वाभ्यासान्नास्मि न
मे नाहमित्यपरिशेषं अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानं ६४ तत्त्वेन विषयेण विषयिणो ज्ञानमुपलक्षयति उक्तरूप
प्रकारतत्त्वविषयज्ञानाभ्यासादादरनैरंतर्यदीर्घकालसेवितात्सत्त्वपुरुषान्यतासाक्षात्कारि ज्ञानमुत्पद्यते यद्विषयाभ्या
सात्तद्विषयमेव साक्षात्कारमुपजनयति तत्त्वविषयश्चाभ्यास इति तत्त्वसाक्षात्कारं जनयत्यत उक्तं विशुद्धमिति कुतो विशु
द्धमित्यत उक्तम् अविपर्ययादिति संशयविपर्ययौ ज्ञानस्याशुद्धी ताभ्यां रहितं विशुद्धं तदिदमुक्तम् अविपर्ययादिति नियतमनिय
ततयाऽऽरूढसंशयोऽपि विपर्ययः तेनाविपर्ययादिति संशयविपर्ययाभावो दर्शितः तत्त्वविषयत्वाच्च संशयविपर्ययाभावः ॥ २४

अतंमिस्रं=२

स्यादेतदुत्पद्यतामिदमीदृशाभ्यासात्तत्त्वज्ञानं तथाप्यनादिमिथ्याज्ञानसंस्कारेण मिथ्याज्ञानं जनयितव्यं तथाच तन्निबंध-
नस्य संसारस्यानुच्छेदप्रसंग इत्यत उक्तं केवलमिति विपर्ययासंशयासंभिन्नं यद्यप्यनादिर्विपर्ययवासना तथापि तत्त्वज्ञा- वो ह्यात्रपि २
नवासनयात्तत्त्वसाक्षात्कारसमुद्भवयादिमत्यापि शक्या समुच्छेत्तुम् तत्त्वपक्षपातो हि धियां स्वभावः यथाहुर्बाह्या अपि नि-
रुपद्रवभूतार्थस्वभावस्य विपर्ययैः नबाधो यत्नवत्त्वेपि बुद्धेस्तत्पक्षपाततः इति ज्ञानस्वरूपमुक्तं नास्मि न मे नाहमिति अस्मी-
ति आत्मनि क्रियामात्रं निषेधयति यथाहुः कृभ्वस्तयः क्रियासामान्यवचना इति तथाचाध्यवसायाभिमानसंकल्पालोचना-
निवांतराणि वा सर्वे व्यापारा आत्मनि प्रतिषिद्धानि बोद्धव्यानि यतश्चात्मनि व्यापारावेशो नास्त्यतो नाहमिति कर्तृपद-
महं जानामि अहं जुहोमि अहं यजेऽहं ददेहं भुंजे इति सर्वत्र कर्तुः परामर्शो न निष्क्रियत्वे च कर्तृत्वाभावात सुष्ठूक्तं नाहमिति अत
एव न मे कर्त्ता हि स्वामितां लभते तदभावात्कुतो भाविका स्वामितेत्यर्थः अथवा नास्मीति नाहं पुरुषोस्मि तेन चाप्रसवधर्मी अप्रसवध-
र्मित्वाच्चाकर्तृत्वमाह नाहमिति अकर्तृत्वाच्च न स्वामितेत्याह नमे इति नन्वेतावत्सु ज्ञातेष्वपि किंचित्कदाचिदज्ञातो विपर्ययास्त-
दज्ञानं च जंतून्बंधयिष्यतीत्यत उक्तमपरिशेषमिति नास्ति किंचित्परिशिष्टं ज्ञातव्यं यदज्ञानं च बंधयिष्यतीत्यर्थः ६४ किं पुन
रनेन दृशेन तत्त्वज्ञानसाक्षात्कारेण सिध्यतीत्यत आह तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्तां प्रकृतिं पश्यति पुरुषः
प्रेक्षकवदवस्थितः स्वच्छः ६५ योगविवेकसाक्षात्कारो हि प्रकृतेः प्रसोतव्यौ तौ चेत्प्रसूतौ नास्याः प्रसोतव्यमवशिष्यते यत्प्रसोष्य-
त इति निवृत्तप्रसवा प्रकृतिर्विवेकज्ञानरूपायार्थस्तस्य वशः सामर्थ्यं तस्मात् अतत्त्वज्ञानपूर्वकाणि खलु धर्मवैराग्यैश्वर्याध-
र्माज्ञानावैराग्यानैश्वर्याणि वैराग्यमपि केवलं तौष्टिकानामतत्त्वज्ञानपूर्वकमेव तत्र तत्त्वज्ञानं विरोधित्वेनातत्त्वज्ञानमुच्छि-
नत्ति कारणरूपानि वृत्याच सप्तरूपाणि न वर्त्तते इति सप्तरूपविनिवृत्ता प्रकृतिः अवस्थितः इति निष्क्रियः स्वच्छ इति रजस्तमोव-
त्तिकलुषया बुध्यासंभिन्नः सात्विकया तु बुध्या तदापि असंभेदोऽस्त्येव अन्यथैवंभूतप्रकृतिदर्शनानुपपत्तेरिति ६५ स्यादेत

न्निवृत्तप्रसवामिति नमु भवतु मह संयोगकृतो हि सर्ग इत्युक्तं योग्यता च संयोगः भोक्तृत्वयोग्यता च पुरुषस्य चैतन्यं भोग्यत्वयोग्यता
च प्रकृते जैडत्वं विषयत्वं च न चैतयोरस्ति निवृत्तिः न च करणीयाभावान्निवृत्तिस्तज्जातीयस्यान्यस्य करणीयत्वात् पुनः पुनः श
ब्दाद्युपभोगवदित्यत आह दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या सति संयोगेपि तयोः प्रयोजनं नास्ति सर्गस्य ६५ व
रेतु नाम पौनःपुन्येन शब्दाद्युपभोगं प्रकृतिर्यथाविवेकख्यातिं न कृतेति कृतविवेकख्यातिस्तु न शब्दाद्युपभोगं जनयति अवि
म५ वेकख्यातिनिबंधनो हि तदुपभोगो निबंधनाभावेन भवितुमर्हतीति अंकुर इव बीजाभावे प्राकृता हि सुखदुःखमोहात्मानः शब्दा २५ पं६
दीस्तदविवेकान्ममैते इत्यभिमन्यमान आत्मोपभुंजीत एवं विवेकख्यातिमपि प्राकृतीमविवेकादेवात्मा मदर्थीमितिमन्यते उत्प
न्ने विवेकख्यातिस्तु तदसंसर्गान्न शब्दादीन्भोक्तुम् इति नापि विवेकख्यातिं प्राकृतीमपि ततो विविक्त आत्मानं स्वार्थामभिमंतुमर्ह
ति पुरुषार्थौ उपभोगविवेकौ प्रकृत्यारंभप्रयोजकाविति अपुरुषार्थौ संतौ न प्रकृतिं प्रयोजयतः तदिदमुक्तं प्रयोजनं नास्ति स
र्गस्येति प्रयुज्यते हि सर्गे हि प्रकृतिरनेनेति प्रयोजनं तत् पुरुषार्थो त्वमा सा तौ पुरुषार्थः ६५ स्यादेतदुपपन्नं तत्त्वसाक्षात्कारश्चेत् तदनंत
दे रमेव मुक्तस्य देहपातः स्यादिति कथमयमदेहः प्रकृतिं पश्येत् अथ तत्त्वज्ञानेपि न मुच्यते कर्मणाम प्रक्षीणत्वात्तेषां कुतः क्षयो
भोगादिति चेदुक्तमेतत्त्वज्ञानं नान्यत्साधनमिति व्यक्ताव्यक्तज्ञविज्ञाना तत्त्वज्ञानेनापवर्ग इति रिक्तं वचः भोगेन चापरिसंख्ये
यः कर्माशयप्रचयोनियतविपाककालः क्षेतव्यस्तस्मादपवर्गप्राप्तिरित्यपि मनोरथमात्रमित्यत आह सम्यग्ज्ञानाधिग
मादधर्मादीनामकारणप्राप्तौ तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ६६ तत्त्वसाक्षात्कारोदयादेवानादिरप्यनिय
तपरिपाककालोपि कर्माशयप्रचयो दग्धबीजभावतया न जात्याद्युपभोगलक्षणाय फलाय कल्पते क्लेशसलिलावसि
क्तायां बुद्धिभूमौ कर्मबीजान्यंकुरं प्रसुवते तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलायां तूषरायां कुतः कर्मबीजानामंकु २५

रश्रमवशात्विस्तुर्तं धर्मादीनामकारणप्राप्तौ अकारणत्वप्राप्ताविपर्ययः उत्पन्नतत्वज्ञानोपि संस्कारवशात्तिष्ठति यथोपरते
पि कुलालव्यापारे चक्रं वेगाख्यसंस्कारवशाद्भ्रमत्तिष्ठति कालपरिपाकवशादुपरते संस्कारे निष्क्रियं भवति शरीरस्थितौ
प्रारब्धविपाकौ धर्माधर्मौ संस्कारः तथा च श्रुतिः भोगेन त्वितरे क्षपयित्वा अथ संपत्स्यत इति तावदेवास्य चिरं यावन्न वि
मोक्ष्ये अथ संपत्स्यत इति च दीयमानविद्यासंस्कारशेषसंस्कारस्तत्वशात्तत्सामर्थ्याद्धृतशरीरस्तिष्ठति ६७ स्यादे
त यदि संस्कारशेषाद्धृतशरीरस्तथापि कदास्य मोक्षो भविष्यतीत्यत आह प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानवि
निवृत्तौ ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ६७ अनारब्धविपाकानां तावत्कर्माशयानां तत्वज्ञानाग्निना
वीजभावो दग्धः प्रारब्धविपाकानां तु भोगेन क्षये सति प्राप्ते शरीरभेदे विनाशे चरितार्थत्वात्कृतप्रयोजनत्वात्
प्रधानस्य तं पुरुषं प्रति निवृत्तौ ऐकान्तिकमवश्यंभावि आत्यन्तिकमविनाशी तु [illegible] अयकैवल्यं दुःखत्रयवियोगमाप्
नोति पुरुषः ६८ प्रमाणोपपादितेप्यर्थे श्रद्धोत्पादनाय परमर्षिपूर्वकत्वमाह पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा
समाख्यातं स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानां ६९ गुह्यं गुहावासिनि वाहिस्थूलधियां दुरधिगममिति यावत्
परमर्षिणा कपिलेन तामिमवश्यं(?) [illegible] आगमिकत्वेन द्रढयति स्थित्युत्पत्तीत्यादि यत्र ज्ञाने पदार्था यथा च[illegible]
पन्नं हंतीति भूतानां प्राणिनां स्थित्युत्पत्तिप्रलया आगमेश्चिन्त्यन्ते ६९ परमर्षिणा यत्समाख्यातं तच्छ्रद्धीमहि पत्पुन

सां०कौ०
२६

26

रीश्वरकृष्णेन कथितं तंत्रं केयं प्रवृत्तं इत्यत आह एतत्पवित्रमग्र्यं मुनिरासुरयेनुकंपया प्रददौ आसुरिरपि पंचशि
खाय तेन च बहुधा कृतं तंत्रं ६९ पवित्रं पावनं दुःखपावनात् पुनातीति अग्र्यं सर्वेभ्यः पवित्रेभ्यः मुख्यं मुनिः क
पिल आसुरये नुकंपया प्रददौ आसुरिरपि पंचशिखाय ६९ शिष्यपरंपरयागतमीश्वरकृष्णेन चैतदार्याभिः सं
क्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धांतं ७० आराद्यातात्तत्त्वेभ्य इत्यार्या आर्या मतिर्यस्य स आर्यमतिः ७०
एतच्च शास्त्रं सकलशास्त्रार्थसूचनान्न तु प्रकरणमित्याह सप्तत्यां किल येर्थास्तेर्थाः कृत्स्नस्य षष्टितंत्रस्य आख्यायिका
विरहिताः परवादविवर्जिताश्चापि ७१ तथा च भोजराजवार्त्तिकं प्रधानास्तित्वमेकत्वमर्थवत्वमथान्यता
पारार्थ्यं च तथानैक्यं वियोगो योग एव च शेषवृत्तिरकर्तृत्वं मूलिकार्थाः स्मृता दश विपर्ययः पंचविधस्तथोक्ता नव
तुष्टयः करणानामसामर्थ्यमष्टाविंशतिधा मतं इति षष्टिः पदार्थानामष्टभिः सह सिद्धिभिरिति सेयं षष्टिपदार्थी क
थितेति सकलशास्त्रार्थकथनान्नेदं प्रकरणमपि तु शास्त्रमेवेति सिद्धं एकत्वमर्थवत्वं पारार्थ्यं च प्रधानमधिकृत्यो
क्तं अन्यत्वमकर्तृत्वं बहुत्वं चेति पुरुषमधिकृत्य अस्तित्वं संयोगो वियोगश्चेत्युभयमधिकृत्य स्थितिरिति स्थूलसू
क्ष्ममधिकृत्य मनांसि कुमुदानीव बोधयंती सदा सतां श्रीवाचस्पतिमिश्राणां कृतिः स्तात्तत्वकौमुदी ॥ १ ॥ इति श्रीम
न्महोपाध्यायवाचस्पतिमिश्रविरचिता सांख्यतत्वकौमुदी समाप्ता ॥ शुभमस्तु ॥ लिखितं गुमानीरामेण पद्मस
रसीतिप्रसिद्धायां पुरि ॥ स्वार्थमिदं ॥

२६